

गणपति·
सरस्वती·


स. दे.
न. चं. दे. १
न. चं. दे. २
न. चं. दे. ३


न. चं. दे.
न. चं. दे. ५
नवचंडी देवी ६
न. चं. दे. ७


न.चं.दे.८
न.चं.दे.९
शिष्ये
प्र.क.


दशमुखी
देवी.


विष्णु.


ब्रह्मदेव.


विष्णु
शिव
ब्रह्मा.
देवी
ग.
व्या.

॥ श्रीगणेशाय नमः ॥ ॥ अथप्रयोगान्त
राणिकात्यायनीतन्त्रोक्तानि ॥ प्रतिश्लो
कमाद्यंतयोः प्रणवंजपेन्मंत्रसिद्धिः ॥ १ ॥
अग्रेसर्वत्रश्लोकपदं मंत्रोपलक्षणम् ॥ सप्र
णवमनुलोमव्याहृतित्रयमादौ अंते तुवि
लोमंतादित्येवंप्रतिश्लोकं कृत्वाशतावृत्तपा
ठेऽतिशीघ्रं सिद्धिः ॥ २ ॥ प्रतिश्लोकमादौ

० जातवेदसइत्यृचंपठेत् सर्वकामसिद्धिः ३॥ वि०
१ अपमृत्युवारणायत्र्यंबकमन्त्रंपठेत्॥आदा
वंतेचशतमित्यर्थः ॥ प्रतिश्लोकंतन्मन्त्र
जपइत्यन्यत्र ॥ ४ ॥ प्रतिश्लोकंशूलेनपा
हिनोदेवीतिपाठादपमृत्युनाशः ॥ अस्य
केवलस्यापिश्लोकस्य लक्षमयुतं सहस्रं १
शतंवाजपेअपमृत्युवारणम्॥५॥प्रतिश्लो

कंशरणागतदीनार्तेतिश्लोकंपठेत्सर्वकार्य
सिद्धिः ॥ ६ ॥ प्रतिश्लोकंकरोतुसानः शु
भेत्यर्द्धं पठेत्सर्वकार्यसिद्धिः ॥ ७ ॥ स्वा
भीष्टवरप्राप्तये एवंदेव्यावरंलब्ध्वेतिश्लो
कंपठेत् ॥ ८ ॥ सर्वापत्तिवारणायप्रति
श्लोकं दुर्गे स्मृतेतिपठेत् ॥ अस्यकेवल
स्यापिश्लोकस्यकार्यानुसारेण लक्षमयु

स० तंसहस्रंशतंवाजपः ॥ ९ ॥ सर्वाबाधेत्य
२ स्यलक्षजपे प्रतिश्लोकंपाठेवा श्लोको
क्तंफलम् ॥ १० ॥ इत्थंयदायदाबाधेति
श्लोकजपेमहामारीशांतिः ॥ ११ ॥ ततो
वध्रेनृपोराज्यमितिमंत्रस्य जपे पुनः स्वरा
ज्यलाभः ॥ १२ ॥ हिनस्तिदैत्यतेजांसि २
इत्यनेनसदीपबलिदाने घंटाबंधने चबाल

ग्रहशांतिः ॥ १३ ॥ आद्यावृत्तिमनुलोमे
नपठित्वा ततो विपरीतक्रमेण द्वितीयाम
नुलोमेन तृतीयामित्येवमावृत्तित्रयेण शी
घ्रंकार्यसिद्धिः ॥ १४ ॥ सर्वापत्तिवारणा
य दुर्गेस्मृतेत्यर्द्धं ततो यदंतियच्चदूरकेइत्यृ
चं तदंते दारिद्र्यदुःखेत्यर्द्धं एवंकार्यानुसा
रेणलक्षमयुतं सहस्रं शतंवाजपः ॥ १५ ॥

प्र० कांसोस्मीत्यृचंप्रतिश्लोकं पठेल्लक्ष्मीप्रा वि०
३ प्तिः ॥ १६ ॥ प्रतिश्लोकमनूणा अस्मि
न्नित्यृचं पठेदृणपरिहारः ॥ १७ ॥ मार
णार्थमेवमुक्त्वासमुत्पत्त्येतिश्लोकं प्रति
श्लोकं पठेत् मारणोक्तावृत्तिभिः फलसि
द्धिः॥ १८ ॥ ज्ञानिनामपिचेतांसि इति ३
श्लोकजपमात्रेण सद्यो मोहनमित्यनुभव

सिद्धम्॥ प्रतिश्लोकंतच्छ्लोकपाठेत्ववश्य
म्॥ १९॥ रोगानशेषानिति श्लोकस्य
प्रतिश्लोकंपाठे सकलरोगनाशः॥ तन्मा
त्रजपेपिसः॥ २०॥ इत्युक्तासातदादेवी
गंभीरेति श्लोकस्यप्रतिश्लोकंपाठेपृथ
ग्जपे वा विद्याप्राप्तिर्वाग्वैकृतनाशश्च
॥ २१॥ भगवत्याकृतंसर्वमित्यादिद्वाद

प्र० शोत्तरशताक्षरोमंत्रः सर्वकामदः सर्वाप वि०
४ त्तिवारणश्च ॥ २२ ॥ देविप्रपन्नार्तिहरे
इतिश्लोकस्य यथाकार्यं लक्षायुतसहस्र
शतान्यतमसंख्यजपे प्रतिश्लोकंपाठेवा
सर्वापन्निवृत्तिः सर्वकामाप्तिश्च ॥ एषुप्र
योगेषुप्रतिश्लोकंदीपाग्रे केवलमेव नम ४
स्करणेऽतिशीघ्रंसिद्धिः ॥ प्रतिश्लोकं का

मबीजसंपुटितस्य एकचत्वारिंशद्दिनं त्रि
रावृत्तौ सर्वकामासिद्धिः ॥ २३ ॥ एकविं
शतिदिनपर्यन्तमुक्तरीत्या प्रत्यहं द्वादशावृ
त्तौ वशीकरणम् ॥ २४ ॥ मायाबीजसंपु
टितस्य फट्पल्लवसहितस्य सप्तदिनपर्यंतं
त्रयोदशावृत्तावुच्चाटनासिद्धिः ॥ २५ ॥
तादृश्यामेव दिनचतुष्टयमेकादशावृत्तौ स

वौंपद्रवनाशः॥ २६ ॥ एकोनपंचाशद्दि
नपर्यंतं प्रतिश्लोकं श्रीबीजसंपुटितस्य
पंचदशावृत्तौ लक्ष्मीप्राप्तिः॥२७॥ प्रति
श्लोकंवाग्बीजसंपुटितस्य शतावृत्त्या वि
द्याप्राप्तिः॥ २८॥ अथशतचण्डीविधिः॥
शङ्करस्यभवान्या वाप्रासादनिकटेशुभम्॥
मण्डपं द्वारवेद्याढ्यं कुर्यात्सध्वजतोरणम्

॥ १ ॥ तत्रकुण्डंप्रकुर्वीतप्रतीच्यांमध्यतो
पिवा॥स्नात्वानित्यक्रियां कृत्वा वृणुयाद्द
शवाडवान्॥ २॥ जितेन्द्रियान्सदाचारा
न्कुलीनान्सत्यवादिनः ॥ वाडवा ब्राह्म
णाः ॥ व्युत्पन्नांश्चण्डिकापाठरताँल्लज्जाद
यावतः ॥ ३ ॥ मधुपर्कविधानेन स्वर्णव
स्त्रादिदानतः॥ जपार्थमासनंमालांदद्यात्ते

भ्योऽपिभोजनम् ॥ ४ ॥ तेहविष्यान्नम
श्चनंतोमंत्रार्थगतमानसाः ॥ भूमौशयानाः
प्रत्येकंजपेयुश्चण्डिकास्तवम् ॥ ५ ॥ मार्कं
डेयपुराणोक्तंदशकृत्वः सचेतसः ॥ नवा
र्णंचण्डिकामंत्रंजपेयुश्चायुतंपृथक् ॥ ६ ॥
पृथक्संपुटीकरणादितिशेषः ॥ प्रत्येकंब्रा
ह्मणैरयुतजपः कार्यः ॥ अष्टमीनवमीचत

र्शीपौर्णमासीषुयथाशतावृत्तिसमाप्तिर्भ
वतितथारंभः कर्त्तव्य इतिसांप्रदायिकाः ॥
यजमानः पूजयेच्च कन्यानां नवकंशुभ
म् ॥ द्विवर्षाद्यादशाब्दांताः कुमारीः परिपू
जयेत् ॥ १ ॥ तासांक्रमेणनामानि ॥ कुमा
री १ त्रिमूर्तिः २ कल्याणी ३ रोहिणी ४
कालिका ५ शांभवी ६ दुर्गा ७ चण्डिका ८

प्र० सुभद्रा ९ इति॥ नाममंत्रैस्तासांपूजा ॥ वि०
७ तत्रहीनाधिकाङ्गी कुष्ठव्रणयुता अंधा का
णा कुरूपा केकरा कुबरी लोमयुग्देहा दा
सीजा रोगिणीत्येवमाद्यावर्ज्याः ॥ विप्रां
सर्वेष्टसंसिद्ध्यैयशसेक्षत्रियोद्भवाम् ॥ वै
श्यजांधनलाभायपुत्राप्त्यैशूद्रजांयजेत् ॥ ७
गंधपुष्पधूपदीपभक्ष्यभोज्यैर्यथाशक्ति व

स्त्राभरणैश्चपूजयेत् ॥ द्विवर्षासाकुमा
र्युक्तात्रिमूर्तिर्हायनत्रिका ॥ चतुरब्दातुक
ल्याणी पञ्चवर्षातुरोहिणी ॥ १ ॥ षडब्दा
कालिकाप्रोक्ताचण्डिकासप्तहायना ॥अष्ट
वर्षाशांभवीस्याद्दुर्गातुनवहायना ॥सुभद्रा
दशवर्षोक्तानाममन्त्रैः प्रपूजयेत् ॥ तासा
मावाहनेमन्त्रः प्रोच्यतेशङ्करोदितः ॥ मं

१० त्राक्षरमयींलक्ष्मींमातृणारूपधारिणीम् ॥ वि०
८ नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्य
हम् ॥ कुमारिकादिकन्यानांपूजामंत्रान्नु
वेऽधुना ॥ जगत्पूज्येजगद्वंद्येसर्वशक्तिस्व
रूपिणि ॥ पूजांगृहाणकौमारि जगन्मात
र्नमोऽस्तुते ॥ त्रिपुरांत्रिपुराधारांत्रिवर्षांज्ञा ८
नरूपिणीम् ॥ त्रैलोकयवंदितांदेवींत्रि

तिंपूजयाम्यहम् ॥ कलात्मिकांकलातीतां कारुण्यहृदयांशिवाम् ॥ कल्याणजननीं देवीं कल्याणीं पूजयाम्यहम् ॥ अणिमादिगुणाधारामकाराद्यक्षरात्मिकाम् ॥ अनंतशक्तिकांलक्ष्मींरोहिणींपूजयाम्यहम् । कामचारींशुभां कांतांकालचक्रस्वरूपिणीम् ॥ कामदां करुणोदारांकालिकांपूज

याम्यहम् ॥ चंडवीरां चंडमायां चंडमुंडप्रभं
जनीम् ॥ पूजयामि सदा देवीं चंडिकां चंडवि
क्रमाम् ॥ सदानंदकरीं शांतां सर्वदेवनमस्कृ
ताम् ॥ सर्वभूतात्मिकां लक्ष्मीं शांभवीं पू
जयाम्यहम् ॥ दुर्गमे दुस्तरे कार्ये भवदुःख
विनाशिनीम् ॥ पूजयामि सदा भक्त्या दुर्गां
दुर्गार्तिनाशिनीम् ॥ सुंदरीं स्वर्णवर्णाभां

सुखसौभाग्यदायिनीम् ॥ सुभद्रजननीं दे
वींसुभद्रांपूजयाम्यहम् ॥ एतैर्मन्त्रैः पुराणो
क्तैस्तांतांकन्यांसमर्चयेत् ॥ इतिपूजनंकु
मारिकाणाम् ॥ वेद्यांविरचिते रम्येसर्व
तोभद्रमण्डले ॥ घटंसंस्थाप्यविधिनात
त्रावाह्यार्चयेच्छिवाम् ॥ तदग्रेकन्यका
श्चापि पूजयेद्ब्राह्मणानपि ॥ उपचारैस्तु

प्र० विविधैर्नवाणावरणान्यपि ॥ ॐकारः प्रथ
१० मं पीठं पूर्णपीठमतः परम् ॥ तृतीयंकामपी
ठंच पूजयेत्सम्प्रदायतः ॥ पूर्वादिदिक्षुपीठ
स्य गणेशादिचतुष्टयम् ॥ गणेशःक्षेत्रपा
लौच पादुके बटुकास्त्रयः ॥ आग्नेय्यादिचतु
र्दिक्षुपूज्यंदेवीचतुष्टयम् ॥ जयाच विजया
चैव जयंती चापराजिता ॥ पूर्वोक्तयंत्रेपूर्व

कोणेसरस्वतीसहितोब्रह्मा श्रीसहितोवि
ष्णुर्नैर्ऋत्यामुमया शिवो वायव्यांषट्कोणे
चक्रमध्यस्थमध्यबीजे श्रींमहालक्ष्मीः ॥
ह्रींमहाकाली ऐंमहासरस्वती दक्षिणवाम
योः॥ उदक्सिंहोदक्षिणेमहिषः ॥ षट्कोणे
षु नंदजारक्तदन्तिकाशाकंभरीदुर्गाभीमा
भ्रामर्य्यः॥ सबिंदुनामाद्यवर्णताराद्याश्चा

सांनाममंत्राः पूजादौ॥तारःप्रणवः॥अष्टत्र
येषुब्रह्माणीमाहेश्वरी कौमारीवैष्णवी वा
राहीनारसिंहीऐंद्रीचामुण्डाउक्तरीत्या ना
ममंत्रैः पूज्याः ॥ ततोविष्णुमायादिचतुर्विं
शतिदेवताः प्रागादिक्रमेण केसरेषुपूज्याः
प्रतिपत्रंचकेसरत्रयम् ॥ ताश्चविष्णुमा
या १ चेतना २ बुद्धि ३ निद्रा ४ क्षुधा ५

छाया ६ शक्ति ७ तृष्णा ८ क्षान्ति ९
जाति १० लज्जा ११ शान्ति १२ श्रद्धा
१३ कांति १४ लक्ष्मी १५ धृति १६
वृत्ति १७ स्मृति १८ दया १९ तुष्टि २०
पुष्टि २१ मातृ २२ भ्रांति २३ चिति २४
रूपा एतावत्यः ॥ सप्तशतीस्तवेपञ्चमा
ध्याये आसां चतुर्विंशतीनां नपाठइतिन

 भ्रमितव्यम् ॥ कात्यायनीतंत्राविरोधात् ॥
 नालमूले तुसंपूज्य माधवादिचतुष्टयम् ॥
आधारः कूर्मशेषौच चतुर्थीपृथिवीनृप ॥
गृहकोणेषुगणेशः क्षेत्रपालो बटुकोयोगि
न्यः ॥ प्रागादिदिक्षुइंद्राद्याश्चेति ॥ एवंचतु
र्दिनंकुर्यात् ॥ तत्रप्रथमेऽह्नि एकावृतिर्द्वितीयेद्वे ॥ तृतीयेतिस्रश्चतुर्थेचतस्रइति ॥ पञ्च

मेहोमः ॥ होमद्रव्याणि ॥ पायसान्नैस्त्रिम
ध्वतैर्द्राक्षारंभाफलादिभिः ॥ मातुलिंगै
रिक्षुखंडैर्नालिकेरयुतैस्तिलैः ॥ जातीफलै
राम्रफलैरन्यैर्मधुरवस्तुभिरिति ॥ सप्तश
त्यादशावृत्त्याप्रतिमंत्रंहुतंचरेत् ॥ अयुतंच
नवार्णेनस्थापितेऽग्नौविधानतः ॥ कृत्वा
वरणंदेवानांहोमं तन्नाममंत्रतः ॥ कृत्वा

पूर्णाहुतिंसम्यग्देवमग्निंविसृज्यच॥ अभि
षिंचेच्चयष्टारं विप्रौघः कलशोदकैः॥ नि
ष्कंसुवर्णमथवा प्रत्येकंदाक्षिणां दिशेत्॥
भोजयेच्चशतंविप्रान्भक्ष्यभोज्यैः पृथग्वि
धैः॥ तेभ्योऽपिदक्षिणांदत्वागृह्णीयादाशि
षस्तथा॥ एवंकृतेजगद्वश्यंसर्वंनश्यंत्युपद्र
वाः॥ इति शतचण्डीविधिः॥

श्रीगणेशाय नमः ॥ अद्येत्यादि० श्री
महाकालीमहालक्ष्मीमहासरस्वतीदेवता
प्रीत्यर्थं चण्डीसप्तशतीपाठाख्यंकर्मकरि
ष्ये ॥ तदङ्गत्वेनादौकवचार्गलाकीलकपठ
नमाद्यन्तयोरष्टोत्तरशतसंख्यनवार्णजप
पूर्वकं क्रमेणरात्रिसूक्तदेवीसूक्तपठनमंतेर
हस्यत्रयपठनंचकरिष्ये ॥ इति संकल्प्य ॥

दे० प्रथमंनमोदेव्यैमहादेव्यैशिवायैसततंनमः क०
१४ नमःप्रकृत्यैभद्रायैनियताःप्रणताःस्मताम्
इतिमंत्रेणपंचोपचारैःपुस्तकपूजांकुर्यात्।
श्रीगणेशायनमः ॥ ॐनमश्चण्डिकायै ॥
मार्कण्डेय उवाच ॥ ॐयद्गुह्यंपरमंलोके
सर्वरक्षाकरंनृणाम् ॥ यन्नकस्यचिदाख्या १४
तंतन्मेब्रूहिपितामह ॥ ॥ब्रह्मोवाच॥अ

स्तिगुह्यतमंविप्रसर्वभूतोपकारकं ॥ देव्या
स्तुकवचंपुण्यंतच्छृणुष्वमहामुने।२। प्रथ
मंशैलपुत्रीचद्वितीयंब्रह्मचारिणी ॥ तृतीयं
चन्द्रघण्टेतिकूष्माण्डेति चतुर्थकम् ॥ ३ ॥
पञ्चमंस्कन्दमातेतिषष्ठंकात्यायनीतिच ॥
सप्तमंकालरात्रीति महागौरीतिचाष्टमम्
॥ ४ ॥ नवमंसिद्धिदात्रीचनवदुर्गाःप्रकीर्ति

दे० तः ॥ उक्तान्येतानिनामानिब्रह्मणैवमहा क०
१९ त्मना ॥ ५ ॥ अग्निनादह्यमानस्तुशत्रुमध्ये
गतोरणे ॥ विषमेदुर्गमेचैवभयार्ताःशरण
ङ्गताः॥६॥नतेषांजायतेकिञ्चिदशुभंरणसं
कटे ॥ नापदंतस्यपश्यामिशोकदुःखभयंन
हि ॥७॥ यैस्तुभक्त्यास्मृतानूनंतेषांवृद्धिः १९
प्रजायते ॥ येत्वांस्मरन्तिदेवेशिरक्षसेतान्न

संशयः ॥ ८ ॥ प्रेतसंस्थातुचामुण्डावाराही
महिषासना ॥ ऐन्द्रीगजसमारूढावैष्णवी
गरुडासना ॥ ९ ॥ माहेश्वरीवृषारूढाकौ
मारीशिखिवाहना ॥ लक्ष्मीः पद्मासनादे
वीपद्महस्ताहरिप्रिया ॥ १० ॥ श्वेतरूपध
रादेवीईश्वरीवृषवाहना ॥ ब्राह्मीहंससमारू
ढा सर्वाभरणभूषिता ॥ ११ ॥ इत्येतामात

दे० र:सर्वा:सर्वयोगसमन्विता: ॥ नानाभरण क०
१६ शोभाढ्यानानारत्नोपशोभिता: ॥ १२ ॥
दृश्यंतेरथमारूढादेव्य:क्रोधसमाकुला: ॥
शंखंचक्रंगदांशक्तिंहलंचमुसलायुधम् ॥
खेटकंतोमरंचैवपरशुंपाशमेवच ॥ १३ ॥
कुन्तायुधंत्रिशूलंचशार्ङ्गमायुधमुत्तमम् ॥ १६
दैत्यानांदेहनाशायभक्तानामभयायच १४

धारयन्त्यायुधानीत्थंदेवानांचहितायवै ॥
नमस्तेस्तुमहारौद्रेमहाघोरपराक्रमे। १५।
महाबलेमहोत्साहेमहाभयाविनाशिनि ॥
त्राहिमां देविदुष्प्रेक्ष्ये शत्रूणांभयवर्द्धिनी
॥ १६ ॥ प्राच्यांरक्षतुमामैन्द्रीआ
ग्नेय्यां भयवर्द्धिनी ॥ दक्षिणेऽवतुवाराहीनै
ऋत्यांखड्गधारिणी ॥ १७॥ प्रतीच्यांवारु

दे० णीरक्षेद्वायव्यांमृगवाहिनी॥उदीच्यांपातु क०
१७ कौमारी ईशान्यांशूलधारिणी ॥ १८ ॥ ऊ
र्ध्वंब्रह्माणीमेरक्षेदधस्ताद्वैष्णवीतथा॥ एवं
दशादिशोरक्षेच्चामुण्डाशववाहना॥ १९ ॥ ज
यामेचाग्रतःपातुविजयापातुपृष्ठतः॥अजि
तावामपार्श्वेतुदक्षिणेचापराजिता ॥२०॥ १९
शिखामुद्योतिनी रक्षेदुमामूर्ध्नि व्यवस्थि

ता॥मालाधरी ललाटे च भ्रुवौ रक्षेद्यश
स्विनी ॥ २१ ॥ त्रिनेत्राचभ्रुवोर्मध्येयम
घण्टाचनासिके॥शंखिनीचक्षुषोर्मध्येश्रो
त्रयोर्द्वारवासिनी ॥ २२ ॥ कपोलौकालि
कारक्षेत्कर्णमूलेतुशाङ्करी ॥ नासिकायांसु
गन्धाचउत्तरोष्ठेचचर्चिका ॥२३॥ अधरे
चामृतकलाजिह्वायांचसरस्वती ॥ दन्ता

दे० १८ क० १८

न्रक्षतुकौमारीकंठदेशेतुचण्डिका ॥२४॥
घंटिकांचित्रघंटाचमहामायाचतालुके ॥
कामाक्षी चिबुकं रक्षेद्वाचं मे सर्वमङ्गला
॥२५॥ग्रीवायांभद्रकालीचपृष्ठवंशेधनुर्ध
री॥ नीलग्रीवाबहिःकण्ठेनालिकांनलकूब
री॥ २६ ॥ स्कन्धयोःखड्गिनीरक्षेद्बाहूमेव
ज्रधारिणी ॥ हस्तयोर्दण्डिनीरक्षेदम्बिका

चांगुलीषुच ॥२७॥ नखाञ्छूलेश्वरीरक्षेत्
कुक्षौरक्षेत्कुलेश्वरी ॥ स्तनौरक्षेन्महादेवीम
नःशोकविनाशिनी ॥२८॥ हृदयेललितादे
वीउदरेशूलधारिणी ॥ नाभौचकामिनीरक्षे
द्गुह्यंगुह्येश्वरीतथा ॥ २९ ॥ पूतनाकामि
कामेढ्रंगुदेमहिषवाहिनी ॥ कट्यांभगवती
रक्षेज्जानुनीविन्ध्यवासिनी ॥ ३० ॥ जंघेम

दे० हावलारक्षेत्सर्वकामप्रदायिनी ॥ गुल्फयो क०
१९ र्नारसिंही च पादपृष्ठे तुतैजसी ॥ ३१ ॥ पा
दांगुलीषुश्रीरक्षेत्पादाधस्स्थलवासिनी ॥
नखान्दंष्ट्राकरालीचकेशांश्चैवोर्ध्वकेशिनी
॥ ३२ ॥ रोमकूपेषुकौमारीत्वचंवागीश्वरी
तथा॥रक्तमज्जावसामांसान्यस्थिमेदांसि १९
पार्वती ॥ ३३ ॥ अन्त्राणिकालरात्रिश्चपि

तंचमुकुटेश्वरी॥पद्मावतीपद्मकोशेकफेचू
डामणिस्तथा ॥ ३४ ॥ ज्वालामुखी नसा
जालमभेद्यासर्वसंधिषु ॥ शुक्रंब्रह्माणीमेर
क्षेच्छायांछत्रेश्वरीतथा ॥ ३५ ॥ अहंकारं
मनोबुद्धिंरक्षेन्मेधर्मधारिणी ॥ प्राणापानौ
तथाव्यानमुदानंचसमानकम् ॥ ३६ ॥ व
ज्रहस्ताचमेरक्षेत्प्राणकल्पंचशोभना॥रसे

दे० रूपेचगन्धेचशब्देस्पर्शेचयोगिनी॥३७॥ क०
२० सत्त्वंरजस्तमश्चैवरक्षेन्नारायणीसदा॥ आ
यूरक्षतुवाराहीधर्मंरक्षतु वैष्णवी ॥ ३८ ॥
यशः कीर्तिंचलक्ष्मींचधनंविद्यांचचक्रि
णी॥गोत्रमिन्द्राणीमेरक्षेत्पशून्मेरक्षचण्डि
के॥३९॥पुत्रान्नक्षेन्महालक्ष्मीभार्यांरक्षतु २०
भैरवी ॥ पन्थानंसपथारक्षेन्मार्गंक्षेमकरी

तथा ॥ ४० ॥ राजद्वारेमहालक्ष्मीर्विजया
सर्वतः स्थिता ॥ रक्षाहीनंतुयत्स्थानंवर्जि
तंकवचेनतु ॥ ४१ ॥ तत्सर्वंरक्षमेदेविजय
न्तीपापनाशिनी ॥ पदमेकंनगच्छेत्तुयदी
च्छेच्छुभमात्मनः ॥ ४२ ॥ कवचेनावृतो
नित्यंयत्रयत्रैवगच्छति ॥ तत्रतत्रार्थलाभ
श्चविजयः सार्वकामिकः ॥ ४३ ॥ यंयंचि

दे० न्तयते कामं तं तं प्राप्नोति निश्चितम् ॥ पर क०
२१ मैश्वर्यमतुलंप्राप्स्यतेभूतलेपुमान् ॥४४॥
निर्भयोजायतेमर्त्यः संग्रामेष्वपराजितः ॥
त्रैलोक्येतुभवेत्पूज्यःकवचेनावृतः पुमान्
॥ ४५ ॥ इदंतुदेव्याःकवचंदेवानामपिदुर्ल
भम् ॥ यः पठेत्प्रयतोनित्यं त्रिसन्ध्यं श्रद्ध २१
यान्वितः ॥ ४६ ॥ दैवीकलाभवेत्तस्यत्रै

लोकयेष्वपराजितः ॥ जीवेद्वर्षशतंसाग्रम
पमृत्युविवर्जितः ॥४७॥ नश्यन्तिव्याधयः
सर्वेलूताविस्फोटकादयः ॥ स्थावरंजंगमं
चैवकृत्रिमंचापियद्विषम् ॥४८॥ अभिचा
राणिसर्वाणिमंत्रयंत्राणिभूतले ॥ भूचराः
खेचराश्चैवजलजाश्चोपदेशिकाः ॥४९॥ स
हजाकुलजामालाडाकिनीशाकिनीतथा ॥

अन्तरिक्षचराघोराडाकिन्यश्च महाबलाः
॥ ५० ॥ ग्रहभूतपिशाचाश्चयक्षगन्धर्वरा
क्षसाः ॥ ब्रह्मराक्षसवेतालाः कूष्माण्डाभैर
वादयः ॥ ५१ ॥ नश्यन्तिदर्शनात्तस्यकव
चेहृदिसंस्थिते ॥ मानोन्नतिर्भवेद्राज्ञस्तेजो
वृद्धिकरंपरम् ॥ ५२ ॥ यशसावर्धतेसोऽपि
कीर्तिमण्डितभूतले ॥ जपेत्सप्तशतीं चण्डीं

कृत्वातुकवचंपुरा॥ ५३॥ यावद्भूमंडलंध
त्तेसशैलवनकाननम्॥ तावत्तिष्ठतिमेदि
न्यांसन्ततिःपुत्रपौत्रिकी॥५४॥ देहांतेपर
मंस्थानंयत्सुरैरपिदुर्लभम्॥ प्राप्नोतिपुरुषो
नित्यंमहामायाप्रसादतः॥ ५५॥ लभतेप
रमंरूपंशिवेनसहमोदते॥५६॥इतिवाराह
पुराणे हरिहरब्रह्मविरचितं देव्याः कवचं

समासम् ॥ १ ॥ श्रीजगदम्बार्पणमस्तु ॥

ॐ नमश्चण्डिकायै ॥ जयन्तीमंगलाका
लीभद्रकालीकपालिनी ॥ दुर्गाक्षमाशिवा
धात्रीस्वाहास्वधानमोस्तुते ॥ १ ॥ जयत्वं
देविचामुंडेजयभूतार्तिहारिणि ॥जयसर्वग
तेदेविकालरात्रिनमोऽस्तुते॥२॥मधुकैटभ
विद्राविविधातृवरदेनमः ॥ रूपंदेहिजयंदे

हियशोदेहिद्विषोजहि ॥ ३ ॥ महिषासुरनि
र्नाशिभक्तानांसुखदेनमः ॥ रूपंदेहिजयंदे
हियशोदेहिद्विषोजहि ॥ ४ ॥ रक्तबीजवधे
देविचंडमुंडविनाशिनि ॥ रूपंदेहिजयंदे
हियशोदेहिद्विषोजहि ॥ ५ ॥ शुम्भस्यैवनि
शुम्भस्यधूम्राक्षस्यचमर्दिनि ॥ रूपंदेहिज
यंदेहियशोदेहिद्विषोजहि ॥ ६ ॥ वन्दितां

अ० घियुगेदेविसर्वसौभाग्यदायिनि॥ रूपंदेहि स्तो०
२४ जयंदेहियशोदेहिद्विषोजहि ॥ ७ ॥ अचि
न्त्यरूपचरितेसर्वशत्रुविनाशिनि ॥ रूपंदे
हिजयंदेहियशोदेहिद्विषोजहि ॥ ८ ॥ नते
भ्यःसर्वदाभक्त्याचंडिकेदुरितापहे ॥ रूपं
देहिजयंदेहियशोदेहिद्विषोजहि॥९॥स्तुव
द्भ्योभक्तिपूर्वंत्वांचंडिकेव्याधिनाशिनि॥

रूपंदेहिजयंदेहियशोदेहिद्विषोजहि ।१०।
चंडिकेसततंयेत्वामर्चयंतीहभक्तितः ॥ रू
पंदेहिजयंदेहियशोदेहिद्विषोजहि ॥ ११ ॥
देहिसौभाग्यमारोग्यंदेहिमेपरमंसुखम् ॥
रूपंदेहिजयंदेहियशोदेहिद्विषोजहि॥१२॥
विधेहिद्विषतांनाशंविधेहिबलमुच्चकैः ॥
रूपंदेहिजयंदेहियशोदेहिद्विषोजहि ।१३।

विधेहिदेविकल्याणंविधेहिपरमांश्रियम्।
रूपंदेहिजयंदेहियशोदेहिद्विषोजहि ।१४।
सुरासुराशिरोरत्ननिघृष्टचरणेम्बिके ॥ रूपं
देहिजयं देहियशोदेहिद्विषोजहि ॥ १५ ॥
विद्यावन्तंयशस्वन्तंलक्ष्मीवंतंजनंकुरु ॥
रूपंदेहिजयंदेहियशोदेहिद्विषोजहि।१६॥
प्रचंडदैत्यदर्पघ्नेचाण्डिकेप्रणतायमे ॥ रूपं

देहिजयंदेहियशोदेहिद्विषोजहि ॥ १७ ॥
चतुर्भुजचतुर्वक्त्रसंस्तुतपरमेश्वरि ॥ रूपं
देहिजयंदेहियशोदेहिद्विषोजहि ॥ १८ ॥
कृष्णेनसंस्तुते देविशश्वद्भक्त्यासदाम्बि
के ॥ रूपंदेहिजयंदेहियशोदेहिद्विषोजहि
॥ १९ ॥ हिमाचलसुतानाथसंस्तुतपरमे
श्वरि॥रूपंदेहिजयंदेहियशोदेहिद्विषोजहि

॥ २० ॥ इन्द्राणीपतिसद्भावपूजितेपरमे
श्वरि ॥ रूपंदेहिजयंदेहियशोदेहिद्विषोज
हि ॥ २१ ॥ देविप्रचण्डदोर्दण्डदैत्यदर्पविना
शिनि ॥ रूपंदेहिजयंदेहियशोदेहिद्विषोज
हि ॥ २२ ॥ देविभक्तजनोद्दामदत्तानन्दो
दयेम्बिके ॥ रूपंदेहिजयंदेहियशोदेहिद्वि
षोजहि ॥ २३ ॥ पत्नींमनोरमांदेहिमनो

वृत्तानुसारिणीम् ॥ तारिणींदुर्गसंसारसाग
रस्यकुलोद्भवाम् ॥ २४ ॥ इदंस्तोत्रंपठि
त्वातुमहास्तोत्रंपठेन्नरः ॥ सतुसप्तशतीसं
ख्यावरमाप्नोतिसम्पदाम्॥२५॥इतिमार्क
ण्डेयपुराणेअर्गलास्तोत्रंसमाप्तम्॥२॥ॐ
नमश्चण्डिकायै॥मार्कण्डेयउवाच ॥ विशु
द्धज्ञानदेहायत्रिवेदीदिव्यचक्षुषे॥ श्रेयःप्रा

सिनिमित्तायनमः सोमार्द्धधारिणे ॥ १ ॥
सर्वमेतद्विजानीयान्मंत्राणामपि कीलक
म् ॥ सोपिक्षेममवाप्नोतिसततंजाप्यतत्परः
॥ २ ॥ सिद्धयन्त्युच्चाटनादीनिवस्तूनिस
कलान्यपि ॥ एतेनस्तुवतांदेवींस्तोत्रमात्रे
णसिद्धयति ॥ ३॥ नयन्त्रं नौषधंतत्रनकि
ञ्चिदपिविद्यते॥ विनाजाप्येनसिद्धयेतसर्व

मुच्चाटनादिकम् ॥४॥ समग्राण्यपिसिद्धयं
ति लोकशङ्कामिमांहरः॥ कृत्वानिमन्त्रया
माससर्वमेवमिदंशुभम् ॥ ५ ॥ स्तोत्रंवैच
ण्डिकायास्तुतच्चगुप्तंचकारसः ॥ समाप्नो
तिसुपुण्येनतांयथावन्नियन्त्रणाम् ॥ ६ ॥
सोपिक्षेममवाप्नोतिसर्वमेवनसंशयः ॥ कृ
ष्णायांवाचतुर्दश्यामष्टम्यां वा समाहितः

॥ ७ ॥ ददातिप्रतिगृह्णातिनान्यथैषाप्रसि
द्ध्यति।इत्थंरूपेणकीलेनमहादेवेनकीलि
तम् ॥ ८॥ योनिष्कीलांविधायैनांनित्यंज
पतिसंस्फुटम् ॥प्रसिद्धः सगणःसोपिगन्ध
र्वोजायतेनरः ॥ ९ ॥ नचैवाप्यटतस्तस्यभ
यंक्वापीह जायते ॥ नापमृत्युवशंयातिमृ
तोमोक्षमवाप्नुयात् ॥ ० ॥ ज्ञात्वाप्रार

भ्य कुर्वीतनकुर्वाणोविनश्यति ॥ ततोज्ञा
त्वैवसम्पन्नमिदम्प्रारभ्यतेबुधैः॥११॥सौ
भाग्यादिच यत्किञ्चिद्दृश्यतेललनाजने ॥
तत्सर्वंतत्प्रसादेन तेनजाप्यमिदं शुभम्
। १२॥ शनैस्तुजप्यमानेऽस्मिन्स्तोत्रेस
म्पत्तिरुच्चकैः॥ भवत्येवसमग्रापिततः प्रार
भ्यमेवतत् ॥ १३॥ऐश्वर्यंयत्प्रसादेन सौ

भाग्यारोग्यसम्पदः॥शत्रुहानिः परो मोक्षः
स्तूयतेसानकिंजनैः॥ १४ ॥ इतिभगव
त्याःकीलकस्तोत्रंसमाप्तम् ॥ ३ ॥ श्रीगण
पतिर्जयति ॥ ॐअस्यश्रीनवार्णमंत्र
स्य ॥ ब्रह्मविष्णुरुद्राऋषयः॥ गायत्र्यु
ष्णिगनुष्टुप्छंदांसि ॥ श्रीमहाकालीमहा
लक्ष्मीमहासरस्वत्यो देवताः॥ ऐंबीजं ॥

ह्रींशक्तिः ॥ क्लींकीलकम् ॥ श्रीमहाकाली
महालक्ष्मीमहासरस्वतीप्रीत्यर्थेजपेविनि
योगः ॥ ब्रह्मविष्णुरुद्रऋषिभ्योनमः शिर
सि गायत्र्युष्णिगनुष्टुप्छंदोभ्योनमः मुखे॥
महाकालीमहालक्ष्मीमहासरस्वतीदेवता
भ्योनमःहृदि ॥ ऐंबीजायनमः गुह्ये ॥ ह्रीं
शक्तयेनमः पादयोः ॥ क्लींकीलकायनमः

न० नाभौ ॥ इतिमूलेनकरौसंशोध्य ॥ ॐऐंअं वि०
२० गुष्ठाभ्यांनमः ॥ ॐह्रींतर्जनीभ्यांनमः ॥
ॐक्लींमध्यमाभ्यांनमः।ॐचामुंडायैअना
मिकाभ्यांनमः ॥ ॐविच्चेकनिष्ठिकाभ्यांन
मः ॥ ॐऐंह्रींक्लींचामुंडायैविच्चे करतलक
रपृष्ठाभ्यां नमः ॥ एवंहृदयादि ॥ ततोऽक्षर ३०
न्यासः ॥ ॐऐंनमः शिखायां ॥ ॐह्रींनमः

दक्षिणनेत्रे ॥ ॐक्लींनमः वामनेत्रे ॥ ॐचां
नमः दक्षिणकर्णे ॥ ॐमुंनमः वामकर्णे ॥
ॐडांनमः दक्षिणनासायाम्॥ ॐयैंनमः वा
मनासायाम् ॥ ॐविंनमःमुखे ॥ ॐच्चेंनमः
गुह्ये॥एवंविन्यस्याष्टवारं मूलेनव्यापकंकु
र्यात्॥ॐऐंप्राच्यैनमः॥ॐऐंआग्नेय्यैनमः॥
ॐह्रींदक्षिणायैनमः ॥ ॐह्रींनैर्ऋत्यैनमः ॥

न० ॐक्लींप्रतीच्यैनमः ॥ ॐक्लींवायव्यैनमः॥ वि०
२१ ॐचामुंडायैउदीच्यैनमः ॥ ॐचामुंडायैई
शान्यैनमः॥ॐऐंह्रींक्लीं चामुंडायैविश्वेऊ
र्ध्वायैनमः॥ॐऐंह्रींक्लींचामुंडायैविश्वेभूम्यै
नमः॥अथध्यानम्॥ खड्गंचक्रगदेषुचापप
रिघान्शूलंभुशुंडींशिरःशंखंसंदधतीं करै २१
स्त्रिनयनांसर्वांगभूषावृताम्।नीलाश्मद्युति

मास्यपाददशकासेवे महाकालिकांयाम
स्तौत्स्वपितेहरौकमलजोहंतुं मधुं कैटभम्
॥ १ ॥ अक्षस्त्रकपरशुंगदेषुकुलिशंपद्मंधनुः
कुंडिकां दण्डंशक्तिमासिंचचर्मजलजंघंटां
सुराभाजनम्॥शूलंपाशसुदर्शनिचदधतीं ह
स्तैः प्रसन्नाननां सेवेसैरिभमर्दिनीमिहम
हालक्ष्मींसरोजस्थिताम् ॥२॥ घंटाशूलह

रा० लानिशंखमुसलेचक्रंधनुःसायकंहस्ताब्जै सू०
३२ र्दधतींघनांतविलसच्छीतांशुतुल्यप्रभाम्।
गौरीदेहसमुद्भवांत्रिनयनामाधारभूतां म
हापूर्वामत्रसरस्वतीमनुभजेच्छुंभादिदैत्या
र्दिनीम्॥ ३ ॥ अष्टोत्तरशतसंख्ययामंत्ररा
जं जपेत् ॥ इति नवार्णविधिः ॥ ॥ अ ३२
थ रात्रिसूक्तम् ॥ ॥ विश्वेश्वरीं जगद्धात्रीं

स्थितिसंहारकारिणीम्॥ निद्राभगवतींवि
ष्णोरतुलांतेजसः प्रभुः॥ १ ॥ ब्रह्मोवाच॥
त्वंस्वाहात्वंस्वधात्वंहिवषट्कारस्वरात्मि
का ॥ सुधात्वमक्षरेनित्येत्रिधामात्रात्मि
कास्थिता॥२॥अर्धमात्रास्थितानित्याया
नुच्चार्याविशेषतः॥त्वमेवसंध्यासावित्रीत्वं
देविजननीपरा॥ ३॥त्वयैतद्धार्यतेविश्वंत्व

रा० येतत्सृज्यतेजगत् ॥ त्वयैतत्पाल्यतेदेवित्वं सू०
१२ मत्स्यंतेचसर्वदा॥४॥विसृष्टौसृष्टिरूपात्वं
स्थितिरूपाच पालने ॥ तथासंहृतिरूपां
तेजगतोऽस्यजगन्मये ॥५॥ महाविद्याम
हामायामहामेधामहास्मृतिः ॥ महामो
हाचभवतीमहादेवीमहासुरी ॥६॥ प्रकृति ३२
स्त्वंचसर्वस्य गुणत्रयविभाविनी ॥ काल

रात्रिर्महारात्रिर्मोहरात्रिश्चदारुणा ॥ ७ ॥
त्वंश्रीस्त्वमीश्वरीत्वं ह्रीस्त्वं बुद्धिर्बोधलक्ष
णा ॥ लज्जापुष्टिस्तथातुष्टिस्त्वंशांतिः क्षां
तिरेवच ॥ ८ ॥ खड्गिनीशूलिनीघोरा
गदिनीचक्रिणीतथा ॥ शंखिनीचापिनी
बाणाभुशुंडीपरिघायुधा ॥ ९ ॥ सौम्या
सौम्यतराशेषसौम्येभ्यस्त्वतिसुंदरी ॥ परा

श० पराणांपरमात्वमेवपरमेश्वरी ॥ १० ॥ यच्च स०
३४ किंचित्कचिद्वस्तुसदसद्वाऽखिलात्मिके ॥
तस्यसर्वस्ययाशक्तिः सात्वंकिंस्तूयसेतदा
॥ ११ ॥ ययात्वयाजगत्स्रष्टाजगत्पात्यत्ति
योजगत् ॥ सोऽपिनिद्रावशंनीतः कस्त्वां
स्तोतुमिहेश्वरः ॥ १२ ॥ विष्णुः शरीरग्रह ३४
णमहमीशानएवच ॥ कारितास्तेयतोत

स्वांकः स्तोतुंशक्तिमान्भवेत् ॥ १३ ॥ सा
त्वमित्थंप्रभावैः स्वैरुदारैर्देविसंस्तुता ॥ मो
ह्यैतौदुराधर्षावसुरौमधुकैटभौ ॥ १४ ॥ प्र
बोधंचजगत्स्वामी नीयतामच्युतोलघु ॥
बोधश्च क्रियतामस्य हंतुमेतौ महासुरौ
॥ १५ ॥ इतिरात्रिसूक्तंसमाप्तम् ॥ * ॥
॥ ॐश्रीगणेशायनमः ॥ अथसप्तशतीन्या

स० सा: ॥ अथप्रथममध्यमोत्तमचरित्राणां ब्र न्या०
३८ ह्मविष्णुरुद्राऋषयः श्रीमहाकालीमहाल
क्ष्मीमहासरस्वत्योदेवताः गायत्र्युष्णिगनु
ष्टुप्छंदांसि ॥ नंदाशाकंभरीभीमाःशक्तयः
रक्तदंतिकादुर्गाभ्रामर्योबीजानि ॥ अग्निर्वा
युःसूर्यस्तत्त्वानि ॥ ऋग्यजुःसामवेदाध्या ३८
नानि ॥ सकलकामनासिद्धये श्रीमहाका

लीमहालक्ष्मीमहासरस्वतीदेवताप्रीत्यर्थं
जपेविनियोगः॥ तत्रादौन्यासाः॥ खड्गिनी
शूलिनीघोरागदिनीचक्रिणीतथा ॥ शंखि
नीचापिनीबाणाभुशुंडीपरिघायुधा ॥ अंगु
ष्ठाभ्यांनमः ॥ शूलेनपाहिनोदेविपाहिख
ड्गेनचाम्बिके ॥ घंटास्वनेननः पाहिचाप
ज्यानिःस्वनेनच ॥ तर्जनीभ्यांनमः ॥ प्रा

४० च्यांरक्षप्रतिच्यांचचंडिकेरक्षदक्षिणे॥भ्रा
२६ मणेनात्मशूलस्यउत्तरस्यांतथेश्वरि ॥ म
ध्यमाभ्यांनमः॥सौम्यानियानिरूपाणित्रै
लोक्येविचरंतिते॥यानिचात्यर्थघोराणि
तैरक्षास्मांस्तथाभुवम् ॥ अनामिकाभ्यां
नमः ॥ खड्गशूलगदादीनियानिचास्त्राणि ३६
तेंबिके॥करपल्लवसंगीनितैरस्मान्रक्षसर्व

तः॥कनिष्ठिकाभ्यांनमः॥ सर्वस्वरूपेसर्वे
शेसर्वशक्तिसमन्विते ॥ भयेभ्यस्त्राहिनोदे
विदुर्गेदेविनमोस्तुते॥ करतलकरपृष्ठाभ्यां
नमः॥ एवंहृदयादि ॥ खड्गिनीशूलिनीघो
रा० हृदयायनमः ॥ शूलेनपाहिनोदेवि०
शिरसेस्वाहा ॥ प्राच्यांरक्षप्रतीच्यांच०
शिखायैवषट् ॥ सौम्यानियानिरूपाणि०

स० कवचायहुं ॥ खड्गशूलगदादीनि० नेत्रत्र न्या०
२७ यायवौषट् ॥ सर्वस्वरूपेसर्वेशे० अस्त्राय
फट् ॥ अथध्यानम् ॥ ॥ विद्युद्दामसमप्रभां
मृगपतिस्कंधस्थितांभीषणांकन्याभिः क
रवालखेटविलसद्धस्ताभिरासेविताम् ॥ ह
स्तैश्चक्रधरालिखेटविशिखांश्चापं गुणंत २७
र्जनीं बिभ्राणामनलात्मिकां शशिधरां

दुर्गांत्रिनेत्रां भजे ॥ १ ॥ इति ध्यानम् ॥
प्रथमचरित्रस्य॥ ब्रह्माऋषिः ॥महाकाली
देवता ॥ गायत्रीछंदः ॥ नंदाशक्तिः ॥रक्तदं
तिकाबीजं ॥ अग्निस्तत्त्वं ॥ ऋग्वेदः स्वरू
पम् ॥ श्रीमहाकालीप्रीत्यर्थंप्रथमचरित्रज
पेविनियोगः ॥ खड्गंचक्रगदेषुचापपरिघा
न्शूलंभुशुंडींशिरः शंखंसंदधतींकरैस्त्रिनय

४० नांसर्वांगभूषावृताम्।नीलाश्मद्युतिमास्य अ० १
३८ पाददशकांसेवेमहाकालिकांयामस्तौत्स्व
पितेहरौकमलजोहंतुंमधुंकैटभम्॥मार्कण्डे
यउवाच॥१॥सावर्णिःसूर्यतनयोयोमनुः
कथ्यतेऽष्टमः॥निशामयतदुत्पत्तिंविस्तरा
द्गदतोमम॥२॥महामायानुभावेनयथाम ३८
न्वंतराधिपः॥सबभूवमहाभागःसावर्णि

स्तनयोरवेः॥ ३॥ स्वारोचिषेऽन्तरे पूर्वं चैत्रवं
शसमुद्भवः॥ सुरथो नाम राजाभूत्समस्ते क्षि
तिमण्डले॥ ४ ॥ तस्य पालयतः सम्यक्प्र
जाः पुत्रानिवौरसान्॥ बभूवुः शत्रवो भूपाः
कोलाविध्वंसिनस्तदा ॥ ५ ॥ तस्य तैरभव
द्युद्धमतिप्रबलदण्डिनः ॥ न्यूनैरपि स तैर्युद्धे
कोलाविध्वंसिभिर्जितः ॥ ६ ॥ ततः स्वपुर

४० मायातोनिजदेशाधिपोऽभवत्॥आक्रान्तः सं०१
४१ समहाभागस्तैस्तदाप्रबलारिभिः॥ ७॥ अ
मात्यैर्बलिभिर्दुष्टैर्दुर्बलस्यदुरात्मभिः॥ को
शोबलंचापहृतंतत्रापिस्वपुरेततः ॥८॥ त
तोमृगयाव्याजेनहृतस्वाम्यः सभूपतिः॥
एकाकीहयमारुह्यजगामगहनंवनम्॥९॥ ३९
स तत्राश्रममद्राक्षीद्द्विजवर्यस्य मेधसः ॥

प्रशांतश्वापदाकीर्णं मुनिशिष्योपशोभि
तम् ॥१०॥ तस्थौकंचित्सकालंचमुनिना
तेनसत्कृतः ॥ इतश्चेतश्चविचरंस्तस्मिन्मु
निवराश्रमे ॥ ११ ॥ सोचिंतयत्तदातत्र
ममत्वाकृष्टचेतनः ॥ मत्पूर्वैः पालितंपूर्वं
मयाहीनंपुरंहितत् ॥ १२ ॥ मद्भृत्यैस्तैर
सद्वृत्तैर्धर्मतः पाल्यतेनवा ॥ नजानेसप्र

धानोमेशूरहस्तीसदामदः ॥ १३ ॥ ममवै
रिवशंयातः कान्भोगानुपलप्स्यते ॥ येम
मानुगतानित्यंप्रसादधनभोजनैः ॥ १४ ॥
अनुवृत्तिंध्रुवंतेऽद्यकुर्वंत्यन्यमहीभृताम् ॥
असम्यग्व्ययशीलैस्तैःकुर्वद्भिः सततं व्य
यम् ॥ १५ ॥ संचितः सोऽतिदुःखेनक्षयंको
शोगमिष्यति ॥ एतच्चान्यच्चसततंचिंतया

मासपार्थिवः ॥ १६ ॥ तत्रविप्राश्रमाभ्या
शेवैश्यमेकंददर्शसः ॥ सपृष्टस्तेनकस्त्वं
भोहेतुश्चागमनेऽत्रकः ॥ १७ ॥ सशोकइ
वकस्मात्त्वंदुर्मनाइवलक्ष्यसे ॥ इत्याकर्ण्य
वचस्तस्यभूपतेःप्रणयोदितम् ॥ १८ ॥ प्र
त्युवाचसतंवैश्यःप्रश्रयावनतोनृपं ॥ १९ ॥
वैश्यउवाच ॥ २० ॥ समाधिर्नामवैश्योऽ

हमुत्पन्नोधनिनांकुले॥ २१ ॥ पुत्रदारैर्निर
 स्तश्चधनलोभादसाधुभिः॥ विहीनश्चधनै
र्दारैः पुत्रैरादायमेधनम् ॥ २२ ॥ वनम
भ्यागतोदुःखीनिरस्तश्चाप्तबन्धुभिः ॥सोऽ
हंनवेद्मिपुत्राणां कुशलाकुशलात्मिकाम्
।२३। प्रवृत्तिस्वजनानांचदाराणांचात्रसं
स्थितः॥ किंनुतेषांगृहेक्षेममक्षेमंकिंनुसांप्र

तम् ॥ २४ ॥ कथंतेकिंनुसद्वृत्तादुर्वृत्ताः किं
नुमेसुताः ॥ २५ ॥ राजोवाच ॥ २६ ॥ यै
र्निरस्तो भवाँल्लुब्धैः पुत्रदारादिभिर्धनैः
॥२७॥ तेषुकिंभवतःस्नेहमनुबध्नातिमान
सम् ॥ २८ ॥ वैश्यउवाच ॥ २९ ॥ एवमेत
द्यथाप्राहभवानस्मद्गतंवचः ॥ ३० ॥ किंक
रोमिनबध्नातिममनिष्ठुरतांमनः ॥ यैः सन्त्य

श० ज्यपितृस्नेहंधनलुब्धैर्निराकृतः॥३१॥प
४२ तिस्वजनहार्दंचहार्दितेष्वेवमेमनः॥ किमे
तन्नाभिजानामिजानन्नपिमहामते॥३२॥
यत्प्रेमप्रवणंचित्तंविगुणेष्वपिबंधुषु। तेषां
कृतेमेनिःश्वासोदौर्मनस्यंचजायते॥३३॥
करोमि किंयन्नमनस्तेष्वप्रीतिषु निष्ठुरम् ४२
॥३४॥मार्कंडेयउवाच॥३५॥ततस्तौस

हितौविप्रतंमुनिंसमुपस्थितौ ॥३६॥ स-
माधिर्नामवैश्योसौ सचपार्थिवसत्तमः ॥
कृत्वा तु तौ यथान्यायंयथार्हंतेन संविदम्
।३७। उपविष्टौकथाः काश्चिच्चक्रतुर्वैश्यपा
र्थिवौ॥३८॥राजोवाच॥३९॥भगवंस्त्वा
महंप्रष्टुमिच्छाम्येकं वदस्वतत् ४० ॥
दुःखाययन्मेमनसः स्वचित्तायत्ततां वि

४० ना ॥ ममत्वंगतराज्यस्यराज्यांगेष्वखिले
४९ ष्वपि॥४१॥ जानतोऽपियथाज्ञस्यकिमेत
न्मुनिसत्तम ॥अयंचानिःकृतःपुत्रैर्दारैर्भृत्यै
स्तथोज्झितः ॥४२॥स्वजनेनचसंत्यक्त
स्तेषुहार्दीतथाप्यति ॥ एवमेषतथाहंचद्वा
वप्यत्यंतदुःखितौ ॥४३॥ दृष्टदोषेऽपिवि ४४
षयेममत्वाकृष्टमानसौ ॥ तत्किमेतन्महा

भागयन्मोहोज्ञानिनोरपि ॥ ४४ ॥ ममास्य
चभवत्येषाविवेकांधस्यमूढता ॥ ४५ ॥
ऋषिरुवाच ॥ ४६ ॥ ज्ञानमस्तिसमस्तस्य
जंतोर्विषयगोचरे ॥ ४७ ॥ विषयश्चमहा
भागयातिचैवंपृथक्पृथक् ॥ दिवांधाः प्रा
णिनःकेचिद्रात्रावंधास्तथापरे ॥ ४८ ॥
केचिद्दिवातथारात्रौप्राणिनस्तुल्यदृष्टयः ।

४० ज्ञानिनोमनुजाः सत्यंकिंनुतेनहिकेवलम् अ० १
४४ ॥४९॥ यतोहिज्ञानिनःसर्वेपशुपक्षिमृगाद
यः ॥ ज्ञानंचतन्मनुष्याणां यत्तेषांमृगप
क्षिणाम् ॥५०॥ मनुष्याणांचयत्तेषांतुल्य
मन्यत्तथोभयोः॥ ज्ञानेऽपिसतिपश्यैतान्प
तङ्गाञ्छावचंचुषु ॥ ५१ ॥ कणमोक्षादृता ४४
न्मोहात्पीडयमानानपिक्षुधा ॥ मानुषामनु

जव्याग्रसाभिलाषाःसुतान्प्रति ॥ ५२ ॥
लोभात्प्रत्युपकारायनन्वेतान्किंनपश्यसि
तथापिममतावर्तैर्मोहगर्तैर्निपातिताः ५३
महामायाप्रभावेण संसारस्थितिकारि
णा ॥ तन्नात्रविस्मयःकार्योयोगनिद्राज
गत्पतेः ॥ ५४ ॥ महामायाहरेश्चैषातयासं
मोह्यतेजगत्॥ज्ञानिनामपिचेतांसिदेवीभ

गवतीहिसा ॥ ५५ ॥ बलादाकृष्यमोहाय
महामायाप्रयच्छति॥ तयाविसृज्यतेविश्वं
जगदेतच्चराचरम्॥५६॥ सैषाप्रसन्नावरदा
नृणांभवतिमुक्तये ॥ साविद्यापरमामुक्तेर्है
तुभूतासनातनी ॥५७॥ संसारबंधहेतुश्चसै
वसर्वेश्वरेश्वरी॥५८॥राजोवाच ॥ ५९ ॥
भगवन्काहिसादेवीमहामायेतियां भवान्

॥ ६०॥ब्रवीतिकथमुत्पन्नासाकर्मास्याश्च
किंद्विज ॥ यत्प्रभावाचसादेवीयत्स्वरूपा
यदुद्भवा ॥६१॥ तत्सर्वंश्रोतुमिच्छामित्व
त्तोब्रह्मविदांवर ॥ ६२ ॥ ऋषिरुवाच
॥ ६३ ॥ नित्यैवसाजगन्मूर्तिस्तयासर्वमि
दंततम् ॥ ६४ ॥ तथापितत्समुत्पत्तिर्बहु
धाश्रूयतांमम ॥ देवानांकार्यसिद्ध्यर्थमा

४० विर्भवतिसायदा ॥६५॥ उत्पन्नेतितदालो अ० १
४६ केसानित्याप्यभिधीयते ॥ योगनिद्रांयदा
विष्णुर्जगत्येकार्णवीकृते ॥ ६६ ॥ आस्ती
र्यशेषमभजत्कल्पांतेभगवान्प्रभुः॥ तदाद्वा
वसुरौ घोरौ विख्यातौ मधुकैटभौ ॥ ६७॥
विष्णुकर्णमलोद्भूतौहंतुंब्रह्माणमुद्यतौ ॥ ४६
सनाभिकमलेविष्णोः स्थितोब्रह्माप्रजाप

तिः ॥६८ ॥ दृष्ट्वातावसुरौचोग्रौप्रसुप्तंचज
नार्दनम् ॥ तुष्टावयोगनिद्रांतामेकाग्रहृदय
स्थितः ॥ ६९ ॥ विबोधनार्थायहरेर्हरिनेत्र
कृतालयाम् ॥ विश्वेश्वरींजगद्धात्रींस्थिति
संहारकारिणीम् ॥ ७० ॥निद्रांभगवतींवि
ष्णोरतुलांतेजसःप्रभुः ॥७१ ॥ ब्रह्मोवाच
॥ ७२॥ त्वंस्वाहात्वंस्वधात्वंहिवषट्कारः

४० स्वरात्मिका ॥७३॥सुधात्वमक्षरेनित्येत्रि अं०१
४७ धामात्रात्मिकास्थिता ॥अर्धमात्रास्थिता
नित्यायानुच्चार्याविशेषतः ॥ ७४ ॥ त्वमेव
संध्यासावित्रीत्वंदेविजननीपरा ॥ त्वयै
तद्धार्यतेविश्वंत्वयैतत्सृज्यतेजगत् ॥७५॥
त्वयैतत्पाल्यतेदेवित्वमत्स्यंतेचसर्वदा ॥ ४७
विसृष्टौसृष्टिरूपात्वं स्थितिरूपाचपाल

ने ॥७६ ॥ तथासंहृतिरूपांतेजगतोऽस्य
जगन्मये ॥ महाविद्यामहामायामहामे
धामहास्मृतिः ॥ ७७ ॥ महामोहाचभव
तीमहादेवीमहासुरी ॥ प्रकृतिस्त्वंचसर्व
स्य गुणत्रयविभाविनी ॥ ७८ ॥ कालरा
त्रिर्महारात्रिर्मोहरात्रिश्चदारुणा ॥ त्वंश्री
स्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा

४० ॥ ७९ ॥ लज्जापुष्टिस्तथातुष्टिस्त्वंशांतिः अ० १
४८ क्षांतिरेवच ॥ खड्गिनीशूलिनीघोरागदि
नीचक्रिणीतथा ॥ ८० ॥ शंखिनीचापि
नीबाणभुशुंडीपरिघायुधा ॥ सौम्यासौ
म्यतराशेषसौम्येभ्यस्त्वातिसुंदरी ॥ ८१ ॥
परापराणांपरमात्वमेवपरमेश्वरी ॥ यच्चकिं ४८
चित्क्वचिद्वस्तुसदसद्वाखिलात्मिके ॥ ८२ ॥

तस्य सर्वस्य या शक्तिः सात्वंकिंस्तयसे
तदा ॥ यथात्वयाजगत्स्रष्टाजगत्पात्यत्ति
योजगत् ॥ ८३ ॥ सोऽपिनिद्रावशंनीतः
कस्त्वांस्तोतुमिहेश्वरः ॥ विष्णुः शरीर
ग्रहणमहमीशानएवच ॥ ८४ ॥ का
रितास्तेयतोऽतस्त्वांकः स्तोतुंशक्तिमान्भ
वेत् ॥ सात्वमित्थंप्रभावैः स्वैरुदारैर्देविसं

७

स्तुता ॥ ८५ ॥ मोहयैतौदुराधर्षाविसुरौम
धुकैटभौ ॥ प्रबोधंचजगत्स्वामीनीयता
मच्युतोलघु ॥ ८६ ॥ बोधश्चक्रियतामस
स्यहंतुमेतौमहासुरौ ॥ ८७ ॥ ऋषिरुवाच
॥ ८८ ॥ एवंस्तुतातदादेवीतामसीतत्रवे
धसा ॥ ८९ ॥ विष्णोःप्रबोधनार्थायनिहं
तुंमधुकैटभौ ॥ नेत्रास्यनासिकाबाहुहृद

येभ्यस्तथोरसः ॥ १० ॥ निर्गम्यदर्शनेत
स्थौब्रह्मणोव्यक्तजन्मनः ॥ उत्तस्थौच
जगन्नाथस्तयामुक्तोजनार्दनः ॥ ११ ॥
एकार्णवेहिशयनात्ततः सदद्दशेचतौ ॥
मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ
॥ १२ ॥ क्रोधरक्तेक्षणावत्तुंब्रह्माणंजनि
तोद्यमौ ॥ समुत्थायततस्ताभ्यांयुयुधेभ

त० गवान्हरिः ॥ १३ ॥ पंचवर्षसहस्राणिबाहु
५० प्रहरणोविभुः ॥ तावप्यतिबलोन्मत्तौम
हामायाविमोहितौ ॥ १४ ॥ उक्तवंतौवरोऽ
स्मत्तोव्रियतामितिकेशवम् ॥ १५ ॥ भ
गवानुवाच ॥ १६ ॥ भवेतामद्य मे तुष्टौ
ममवध्यावुभावपि ॥ १७ ॥ किमन्ये ५०
नवरेणात्रएतावद्धिवृतंमया ॥ १८ ॥

ऋषिरुवाच ॥ ९९ ॥ वंचिताभ्यामिति
तदासर्वमापोमयंजगत् ॥ १०० ॥ विलो
कयताभ्यांगदितोभगवान्कमलेक्षणः ॥
आवांजहिनयत्रोर्वी सलिलेन परिप्लुता
॥ १०१ ॥ ऋषिरुवाच ॥ १०२ ॥ तथेत्यु
क्त्वाभगवताशंखचक्रगदाभृता ॥ कृत्वा
चक्रेणवैछिन्नेजघनेशिरसीतयोः॥ १०३॥

एवमेषासमुत्पन्नाब्रह्मणासंस्तुतास्वयम्॥ अ०
५१ प्रभावमस्यादेव्यास्तुभूयः शृणुवदामि ते
॥ १०४ ॥ इतिमार्कण्डेयपुराणेसावर्णि
केमन्वंतरेदेवीमाहात्म्ये मधुकैटभवधोना
मप्रथमोऽध्यायः॥ १ ॥ उवाच॥ १४॥
अर्ध ॥ २४ ॥ श्लोक ॥ ६६ ॥ एवं ५१
॥ १०४ ॥ मध्यमचरितस्य विष्णुर्ऋ

षिः ॥ महालक्ष्मीर्देवता ॥ उष्णिकछंदः ॥
शाकंभरीशक्तिः॥ दुर्गाबीजं॥ वायुस्तत्त्वं॥
यजुर्वेदः स्वरूपं॥महालक्ष्मीप्रीत्यर्थंमध्य
मचरितजपेविनियोगः ॥ ॐ अक्षस्त्रक्पर
शुंगदेषुकुलिशं पद्मं धनुः कुंडिकां दंडं शक्ति
मसिंचचर्मजलजंघंटांसुराभाजनं ॥ शूलं
पाशसुदर्शने च दधतीं हस्तैः प्रसन्नाननां

सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोज
स्थिताम् ॥ ऋषिरुवाच ॥ १ ॥ देवासुरम
भूद्युद्धंपूर्णमब्दशतंपुरा ॥ महिषेसुराणाम
धिपेदेवानांचपुरंदरे ॥ २ ॥ तत्रासुरैर्महावी
र्यैर्देवसैन्यं पराजितम् ॥ जित्वाचसकला
न्देवानिंद्रोऽभून्महिषासुरः ॥ ३ ॥ ततः

जितादेवाः पद्मयोनिंप्रजापतिम् ॥ पुरस्कृ

त्यगतास्तत्रयत्रेशगरुडध्वजौ ॥४॥ यथावृ
त्तंतयोस्तद्वन्महिषासुरचेष्टितम् ॥ त्रिदशाः
कथयामासुर्देवाभिभवविस्तरम् ॥ ५ ॥ सू
र्येंद्राग्न्यनिलेंदूनांयमस्यवरुणस्यच ॥ अ
न्येषांचाधिकारान्स स्वयमेवाधितिष्ठति
॥६ ॥ स्वर्गान्निराकृताः सर्वैतेनदेवगणाभु
वि ॥ विचरंतियथामर्त्यामहिषेणदुरात्मना

स० ॥७॥ एतद्वः कथितं सर्वममरारिविचेष्टितं ॥ अ०२
५३ शरणं वः प्रपन्नाः स्मो वधस्तस्य विचिंत्यतां
॥ ८ ॥ इत्थं निशम्य देवानां वचांसि मधुसूद
न:॥ चकार कोपं शंभुश्च भ्रुकुटीकुटिलाननौ
॥९॥ ततोतिकोपपूर्णस्य चक्रिणो वदनात्त
त:॥ निश्चक्राम महत्तेजो ब्रह्मण: शंकरस्य च ५३
॥१०॥ अन्येषां चैव देवानां शक्रादीनां शरी

रतः ॥ निर्गतंसुमहत्तेजस्तच्चैक्यंसमगच्छ
त ॥ ११ ॥ अतीवतेजसःकूटंज्वलंतमिव
पर्वतम्॥ददृशुस्तेसुरास्तत्रज्वालाव्याप्तदि
गंतरम्॥ १२ ॥अतुलंतत्रतत्तेजःसर्वदेवश
रीरजम्॥एकस्थंतदभून्नारीव्याप्तलोकत्रयं
त्विषा ॥ १३ ॥ यदभूच्छांभवंतेजस्तेना
जायततन्मुखम्॥याम्येनचाभवन्केशाबा

हवो विष्णुतेजसा ॥१४॥ सौम्येनस्तनयो
र्युग्मंमध्यंचैंद्रेणचाभवत् ॥ वारुणेनचजं
घोरूनितंबस्तेजसाभुवः ॥ १५ ॥ ब्रह्मण
स्तेजसापादौतदंगुल्योऽर्कतेजसा॥ वसूनां
चकरांगुल्यःकौबेरेणचनासिका ॥ १६ ॥
तस्यास्तुदंताःसंभूताःप्राजापत्येनतेजसा॥
नयनत्रितयंजज्ञेतथापावकतेजसा॥१७॥

भ्रुवौचसंध्ययोस्तेजः श्रवणावनिलस्यच ॥अन्येषां चैवदेवानांसंभवस्तेजसांशिवा ॥ १८ ॥ ततस्समस्तदेवानांतेजोराशिसमुद्भवाम् ॥ तांविलोक्यमुदंप्रापुरमरामहिषार्दिताः ॥ १९ ॥ शूलंशूलाद्विनिष्कृष्यददौतस्यैपिनाकधृक्॥चक्रंचदत्तवान्कृष्णः समुत्पाट्यस्वचक्रतः॥२०॥शंखंचवरुणः

शक्तिंददौतस्यैहुताशनः ॥ मारुतोदत्तवां अ०२
श्चापंवाणपूर्णेतथेषुधी ॥ २१ ॥ वज्रमिंद्रः
समुत्पाटयकुलिशादमराधिपः॥ ददौतस्यै
सहस्राक्षोघंटामैरावताद्गजात् ॥ २२ ॥ का
लदंडाद्यमोदंडंपाशंचांबुपतिर्ददौ ॥ प्रजाप
तिश्चाक्षमालांददौब्रह्माकमंडलुम ॥ २३ ॥ ५९
समस्तरोमकूपेषुनिजरश्मीन्दिवाकरः॥का

लश्च दत्तवान्खड्ग तस्याश्चमंच निर्मलम्
॥२४॥ क्षीरोदश्चामलंहारमजरेचतथांबरे
॥ चूडामणिं तथादिव्यं कुंडलेकटकानिच
॥ २५ ॥ अर्धचंद्रंतथाशुभ्रंकेयूरान्सर्वबा
हुषु॥ नूपुरौ विमलौ तद्वद्ग्रैवेयकमनुत्तमम्
॥ २६ ॥ अंगुलीयकरत्नानि समस्तास्वं
गुलीषुच ॥ विश्वकर्माददौतस्यैपरशुंचाति

निर्मलं ॥ २७॥ अस्त्राण्यनेकरूपाणितथा
भेद्यंचदंशन ॥ अम्लानपंकजांमालांशिर
स्युरसिचापराम् ॥२८॥ अददज्जलधिस्त
स्यैपंकजंचातिशोभनं॥ हिमवान्वाहनंसिं
हंरत्नानिविविधानिच ॥२९॥ ददावशून्यं
सुरयापानपात्रंधनाधिपः॥शेषश्चसर्वनागे
शोमहामणिविभूषितम्॥३ ०॥नागहारंद

दौतस्यैधत्तेयःपृथिवीमिमां ॥ अन्यैरपिसु
रैर्दैवीभूषणैरायधैस्तथा ॥ ३१ ॥ सम्मानि
ताननादोच्चैःसाट्टहासंमुहुर्मुहुः ॥ तस्याना
देनघोरेणकृत्स्नमापूरितंनभः ॥ ३२ ॥ अ
मायतातिमहताप्रतिशब्दोमहानभूत् ॥ चु
क्षुभुः सकला लोकास्समुद्राश्च चकंपिरे
॥ ३३ ॥ चचालवसुधा चेलुःसकलाश्चम

हीधराः॥जयेतिदेवाश्चमुदातामूचुःसिंहवा
हिनीम् ॥ ३४ ॥ तुष्टुवुर्मुनयश्चैनांभक्तिन
म्रात्ममूर्तयः॥दृष्ट्वासमस्तंसंक्षुब्धंत्रैलोक्य
ममरारयः॥३५॥ सन्नद्धाखिलसैन्यास्ते
समुत्तस्थुरुदायुधाः॥ आःकिमेतदितिक्रो
धादाभाष्यमहिषासुरः।३६। अभ्यधावत
तंशब्दमशेषैरसुरैर्वृतः।सददर्शततोदेवींव्या

तलोकत्रयांत्विषा ॥ ३७॥ पादाक्रान्त्यानत
भुवंकिरीटोल्लिखितांबरां ॥क्षोभिताशेषपा
तालांधनुर्ज्यानिःस्वनेनताम् ॥ ३८॥दिशो
भुजसहस्रेणसमंताद्व्याप्यसंस्थितां ॥ततः
प्रववृतेयुद्धंतयादेव्यासुरद्विषाम् ॥ ३९ ॥
शस्त्रास्त्रैर्बहुधामुक्तैरादीपितादिगंतरं ॥ महि
षासुरसेनानीश्चिक्षुराख्योमहासुरः ॥४०॥

स० युयुधेचामरश्चान्यैश्चतुरंगबलान्वितः ॥ अ० २
५८ रथानामयुतैः षड्भिरुदग्राख्यो महासुरः
॥ ४१ ॥ अयुध्यतायुतानांचसहस्रेणम
हाहनुः ॥ पंचाशद्भिश्चनियुतैरासिलोमा
महासुरः ॥ ४२ ॥ अयुतानां शतैः षडि
र्बाष्कलोयुयुधेरणे ॥ गजवाजिसहस्रौ ५८
घैरनेकैः परिवारितः ॥ ४३ ॥ वृतोरथा

नांकोटयाचयुद्धे तस्मिन्नयुध्यत ॥ बिडा
लाख्योयुतानां च पंचाशद्भिरथायुतैः
॥ ४४ ॥ युयुधेसंयुगेतत्ररथानां परिवा
रितः ॥ अन्येचतत्रायुतशो रथानागहयैर्वृ
ताः ॥ ४५ ॥ युयुधुस्संयुगेदेव्यासहतत्र
महासुराः ॥ कोटिकोटिसहस्रैस्तुरथानां
दन्तिनांतथा ॥ ४६ ॥ हयानांचवृतोयुद्धे

तत्राभून्महिषासुरः ॥ तोमरैर्भिंदिपालैश्च अ० २
शक्तिभिर्मुसलैस्तथा ॥ ४७ ॥ युयुधुः सं
युगेदेव्याखड्गैःपरशुपाट्टिशैः ॥ केचिच्चाचि
क्षिपुःशक्तीःकेचित्पाशांस्तथापरे ॥ ४८ ॥
देवींखड्गप्रहारैस्तुतेतांहंतुंप्रचक्रमुः॥ सापि
देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका ५९
॥ ४९ ॥ लीलयैवप्रचिच्छेदनिजशस्त्रा

स्त्रवर्षिणी ॥ अनायस्तानना देवी स्तूयमा
नासुरर्षिभिः ॥ ५० ॥ मुमोचासुरदेहेषुश
स्त्राण्यस्त्राणिचेश्वरी ॥ सोऽपिक्रुद्धो धुतसटो
देव्यावाहनकेसरी ॥ ५१ ॥ चचारासुरसै
न्येषुवनेष्विवहुताशनः ॥ निःश्वासान्मुमु
चे यांश्चयुध्यमानारणेऽम्बिका ॥ ५२ ॥ त
एवसद्यः संभूतागणाः शतसहस्रशः ॥ युयु

स० धुस्तेपरशुभिर्भिंदिपालासिपट्टिशैः ॥५३॥ अ०२
६० नाशयंतोऽसुरगणान्देवीशक्त्युपबृंहिताः ॥
अवादयंत पटहान् गणाः शंखांस्तथापरे
॥ ५४ ॥ मृदंगांश्चतथैवान्येतस्मिन्युद्धम
होत्सवे ॥ ततोदेवीत्रिशूलेनगदयाशक्तिवृ
ष्टिभिः ॥ ५५ ॥ खड्गादिभिश्चशतशोनिज ६०
घानमहासुरान् ॥ पातयामास चैवान्या

न्घंटास्वनविमोहितान् ॥ ५६ ॥ असुरान्
भुवि पाशेन बध्वा चान्यानकर्षयत् ॥ के
च्चिद्द्विधाकृतास्तीक्ष्णैः खड्गपातैस्तथापरे
॥ ५७ ॥ विपोथितानिपातेनगदयाभुविशे
रते ॥ वेमुश्चकेचिद्रुधिरं मुसलेन भृशंहताः
॥ ५८ ॥ केचिन्निपातिताभूमौभिन्नाः शू
लेनवक्षसि॥ निरंतराश्शरौघेणकृताः केचि

म० द्रणाजिरे ॥ ५९ ॥ सेनानुकारिणः प्राणान् अ०२
६१ मुमुचुस्त्रिदशार्दनाः ॥ केषांचिद्बाहवश्छि
न्नाश्छिन्नग्रीवास्तथापरे ॥ ६० ॥ शिरां
सिपेतुरन्येषामन्येमध्येविदारिताः ॥ वि
च्छिन्नजंघास्त्वपरे पेतुरुर्व्यां महासुराः
॥ ६१ ॥ एकबाह्वक्षिचरणाः केचिद्देव्याद्वि ६१
धाकृताः ॥ छिन्नेऽपिचान्येशिरसिपतिताः

पुनरुत्थिताः ॥ ६२ ॥ कबंधायुयुधुर्देव्यागृ
हीतपरमायुधाः ॥ ननृतुश्चापरेतत्रयुद्धेतूर्य
लयाश्रिताः ॥ ६३ ॥ कबंधाश्छिन्नशिरसः
खड्गशक्त्यृष्टिपाणयः ॥ तिष्ठतिष्ठेतिभाषं
तोदेवीमन्येमहासुराः ॥ ६४ ॥ पातितैरथ
नागाश्वैरसुरैश्चवसुंधरा ॥ अगम्यासाभव
त्तत्रयत्राभूत्समहारणः ॥ ६५ ॥ शोणितौ

स० घामहानध्वस्सध्वस्तत्र विसुस्रुवुः॥ मध्येचा अ० २
६२ सुरसैन्यस्यवारणासुरवाजिनाम् ॥ ६६ ॥
क्षणेनतन्महासैन्यमसुराणांतथाम्बिका॥
निन्येक्षयं यथा वह्निस्तृणदारुमहाचयम्
॥६७ ॥ सचसिंहोमहानादमुत्सृजन्धुतके
सरः ॥ शरीरेभ्योऽमरारीणामसूनिवविचि ६२
न्वति ॥ ६८ ॥ देव्यागणै

ष्टुंतथासुरैः ॥ यथैषांतुतुषुर्देवाःपुष्पवृष्टिमु
चोदिवि ॥ ६९ ॥ इतिमार्कण्डेयपुराणे सा
वर्णिकेमन्वंतरे देवीमाहात्म्येमहिषासुर
सैन्यवधोनामद्वितीयोऽध्यायः ॥ २ ॥उवा
च ॥ १ ॥ श्लोक ॥ ६८ ॥ एवं ॥ ६९ ॥
एवमादितः ॥ १७३ ॥ ॥ ॥ ॥
॥ ऋषिरुवाच ॥ १ ॥ निहन्यमानंत

स० तसैन्यमवलोक्यमहासुरः ॥ सेनानीश्चि अ०२
६६ क्षुरःकोपाद्ययौयोद्धुमथांविकाम् ॥ २ ॥
सदेवींशरवर्षेणववर्षसमरेऽसुरः ॥ यथामे
रुगिरेःशृंगंतोयवर्षेणतोयदः ॥ ३ ॥ त
स्यच्छित्वाततोदेवी लीलयैवशरोत्करा
न् ॥ जघानतुरगान्बाणैर्यंतारंचैववाजि ६२
नाम् ॥ ४ ॥ चिच्छेदचधनुःसद्योध्वजं

चातिसमुच्छ्रितम् ॥ विव्याधचैवगात्रेषु
च्छिन्नधन्वानमाशुगैः ॥ ५ ॥ सच्छिन्नध
न्वाविरथोहताश्वोहतसारथिः ॥ अभ्य
धावततांदेवींखड्गचर्मधरोऽसुरः ॥ ६ ॥ सिं
हमाहत्यखड्गेनतीक्ष्णधारेणमूर्धनि ॥ आ
जघानभुजेसव्येदेवीमप्यतिवेगवान् ॥७॥
तस्याः खड्गोभुजंप्राप्यपफालनृपनन्दन ॥

स० ततोजग्राह शूलं स कोपादरुणलोचनः अ०३
६३ ॥ ८ ॥ चिक्षेपचततस्तत्तुभद्रकाल्यांम
हासुरः ॥ जाज्वल्यमानंतेजोभीरविबिं
बमिवांबरात् ॥ ९ ॥ दृष्ट्वातदापतच्छू
लंदेवीशूलममुञ्चत ॥ तच्छूलंशतधातेन
नीतंसचमहासुरः॥ १०॥ हतेतस्मिन्महा ६४
वीर्येमाहिषस्यचमूपतौ ॥ आजगामगजा

रूढश्चामरस्त्रिदशार्दनः॥ ११॥ सोपिशक्तिं
मुमोचाथदेव्यास्तामंबिकाद्रुतम् ॥हुंकारा
भिहतांभूमौपातयामासनिष्प्रभां ॥ १२ ॥
भग्नांशक्तिंनिपतितांदृष्ट्वाक्रोधसमन्वितः।
चिक्षेपचामरःशूलं बाणैस्तदपिसाच्छिन
त् ॥ १३ ॥ ततःसिंहःसमुत्पत्यगजकुंभां
तरेस्थितः ॥ बाहुयुद्धेनयुयुधेतेनोच्चैस्त्रिद

शारिणा ॥ १४ ॥ युध्यमानौ ततस्तौतु त
स्मान्नागान्महींगतौ ॥ युयुधातेतिसंरब्धौ
प्रहारैरतिदारुणैः ॥ १५ ॥ ततोवेगात्खमु
त्पत्यनिपत्यचमृगारिणा ॥ करप्रहारेणाशि
रश्चामरस्यपृथक्कृतम्॥ १६ ॥उदग्रश्चरणेदे
व्याशिलावृक्षादिभिर्हतः ॥ दंतमुष्टितलैश्चै

दापातैश्चूर्णयामासचोद्धतम् ॥ बाष्कलंभि
दिपालैश्चबाणैस्ताम्रंतथांधकम् ॥ १८ ॥
उग्रास्यमुग्रवीर्यंचतथैवचमहाहनुम् ॥ त्रि
नेत्राचात्रिशूलेनजघानपरमेश्वरी ॥ १९ ॥
बिडालस्यासिना कायात्पातयामासवैशि
रः॥ दुर्धरंदुर्मुखंचोभौशरैर्निन्ये यमक्षयम्
॥ २० ॥ एवंसंक्षीयमाणेतुस्वसैन्येमाहिषा

सुरः ॥ माहिषेणस्वरूपेणत्रासयामासता
न्गणान् ॥ २१ ॥ कांश्चित्तुंडप्रहारेणखु
रक्षेपैस्तथापरान् ॥ लांगूलताडितांश्चा
न्यान् शृंगाभ्यांचविदारितान् ॥ २२ ॥ वे
गेनकांश्चिदपरान्नादेनभ्रमणेनच॥ निःश्वा
सपवनेनान्यान्पातयामासभूतले॥ २३ ॥

ततोऽम्बिका ॥ २४ ॥ सोऽपि कोपान्महा
वीर्यः खुरक्षुण्णमहीतलः ॥ शृंगाभ्यांपर्व
तानुच्चांश्चिक्षेपचननादच॥ २५ ॥ वेग
भ्रमणविक्षुण्णामहीतस्यव्यशीर्यत ॥ लां
गूलेनाहतश्चाब्धिः प्लावयामास सर्वतः
॥ २६ ॥ धुतशृंगविभिन्नाश्चखंडंखंडंययु

घ्नाः ॥ श्वासानिलास्ताः शतशो निपेतु
र्नभसोऽचलाः ॥ २७ ॥ इतिक्रोधसमा
ध्मातमापततंमहासुरम् ॥ दृष्ट्वासाचंडिका
कोपं तद्वधायतदाकरोत् ॥ २८ ॥ साक्षि
प्त्वातस्यवैपाशंतंबबंधमहासुरम् ॥ तत्या
जमाहिषंरूपंसोऽपिबद्धोमहामृधे॥ २९ ॥
ततःसिंहोऽभवत्सद्योयावत्तस्याम्बिकाशि

रः ॥ छिनत्ति तावत्पुरुषः खड्गपाणिरदृ
श्यत ॥ ३० ॥ ततएवाशुपुरुषंदेवी चिच्छे
दसायकैः ॥ तंखड्गचर्मणासार्धंततः सोऽभू
न्महागजः ॥ ३१ ॥ करेणचमहासिंहंतंच
कर्षजगर्जंच ॥ कर्षतस्तुकरंदेवीखड्गेनानिर
कृंतत ॥ ३२॥ ततोमहासुरोभूयोमाहिषंव
पुरास्थितः॥तथैवक्षोभयामासत्रैलोकयंस

स० चराचरम् ॥३३॥ ततःक्रुद्धाजगन्माताच अ० ३
६८ ण्डिकापानमुत्तमम् ॥ पपौपुनःपुनश्चैवज
हासारुणलोचना ॥ ३४॥ ननर्दचासुरःसो
पिबलवीर्यमदोद्धतः ॥ विषाणाभ्यांचचि
क्षेप चंडिकांप्रतिभूधरान् ॥३५ ॥ साचता
न्प्रहितांस्तेनचूर्णयंतीशरोत्करैः ॥ उवाच ६८
तंमदोद्धूतमुखरागाकुलाक्षरम् ॥ ३६ ॥ दे

व्युवाच ॥ ३७ ॥ गर्जगर्जक्षणंमूढमधुयाव
त्पिबाम्यहं॥ मयात्वयिहतेत्रैवगर्जिष्यंत्या
शुदेवताः ॥ ३८ ॥ ऋषिरुवाच ॥ ३९ ॥
एवमुक्त्वासमुत्पत्यसारूढातंमहासुरं ॥पा
देनाक्रम्यकंठेचशूलेनैनमताडयत् ॥४०॥
ततःसोपिपदाक्रांतस्तयानिजमुखात्ततः॥
अर्धनिष्क्रान्तएवासीद्देव्यावीर्येण संवृतः

॥ ४१ ॥ अर्धनिष्क्रांतएवासौयुध्यमानो

महासुरः ॥ तयामहासिनादेव्याशिरश्छि

त्वानिपातितः ॥ ४२ ॥ ततोहाहाकृतंसर्वं

दैत्यसैन्यंननाशतत् ॥ प्रहर्षंचपरंजग्मुः

सकलादेवतागणाः ॥ ४३॥ तुष्टुवुस्तांसुरा

देवींसहादिव्यैर्महर्षिभिः॥ जगुर्गंधर्वपतयो

ननृतुश्चाप्सरोगणाः ॥ ४४ ॥ इतिमार्कण्डे

यपुराणे सावर्णिके मन्वंतरे देवीमाहा
त्म्ये महिषासुरवधोनामतृतीयोऽध्यायः ॥
॥ ३ ॥ ॥ उवाच ॥ ३ ॥ ॥ श्लोक ॥
॥४१॥ एवं ॥४४॥ एवमादितः ॥२१७॥
ऋषिरुवाच ॥ १ ॥ शक्रादयःसुरगणानि
हतेऽतिवीर्यै तास्मिन्दुरात्मानिसुरारिबलेच
देव्या॥तांतुष्टुवुःप्रणतिनम्राशिरोधरांसावा

दु० ग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥ २ ॥ दे
७० व्याययाततमिदंजगदात्मशक्त्या निश्शेष
देवगणशक्तिसमूहमूर्त्या ॥ तामंबिकाम
खिलदेवमहर्षिपूज्यां भक्त्यानताःस्मवि
दधातुशुभानिसानः ॥ ३ ॥ यस्याःप्रभावम
तुलंभगवाननंतोब्रह्माहरश्च नहिवक्तुमलं ७०
बलंच ॥ साचंडिकाखिलजगत्परिपालना

य नाशाय चाशुभभयस्य मतिं करोतु
॥ ४ ॥ याश्रीः स्वयंसुकृतिनां भवनेष्वल
क्ष्मीः पापात्मनांकृतधियांहृदयेषुबुद्धिः ॥
श्रद्धासतांकुलजनप्रभवस्यलज्जातां त्वां
नताः स्मपरिपालयदेवि विश्वम् ॥ ५ ॥
किंवर्णयामतवरूपमचिंत्यमेतत्किं चाति
वीर्यमसुरक्षयकारिभूरि ॥ किंचाहवेषुच

स० रितानितवातियानि सर्वेषुदेव्यसुरदेवग अ०४
७१ णादिकेषु ॥ ६ ॥ हेतुः समस्तजगतांत्रि
गुणापिदोषैर्नज्ञायसे हरिहरादिभिरप्यपा
रा ॥ सर्वाश्रयाखिलमिदंजगदंशभूतम
व्याकृताहिपरमा प्रकृतिस्त्वमाद्या ॥ ७॥
यस्याः समस्तसुरतासमुदीरणेनतृप्तिप्रया ७१
तिसकलेषुमखेषुदेवि ॥ स्वाहासिवैपितृ

गणस्यच तृप्तिहेतुरुच्चार्यसेत्वमतएवजनैः
स्वधाच ॥ ८ ॥ यामुक्तिहेतुरविचिंत्यम
हाव्रतात्वमभ्यस्यसे सुनियतेंद्रियतत्त्वसा
रैः॥ मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्वि
द्यासिसाभगवती परमाहि देवि॥९॥शब्दा
त्मिकासुविमलर्ग्यजुषांनिधानमुद्गीथरम्य
पदपाठवतांचसाम्नां ॥ देवित्रयीभगवती

भवभावनायवार्ताचसर्वजगतां परमार्तिहं
त्री ॥१०॥ मेधासिदेविविदिताखिलशास्त्र
सारा दुर्गासिदुर्गभवसागरनौरसंगा ॥ श्रीः
कैटभारिहृदयैककृताधिवासा गौरी त्वमेव
शशिमौलिकृतप्रतिष्ठा ॥११॥ ईषत्सहास
ममलं परिपूर्णचंद्रबिम्बानुकारिकनकोत्त
मकांतिकांतम्। अत्यद्भुतंप्रहृतमात्तरुषात

थापि वक्रं विलोक्य सहसा महिषासुरेण
॥१२॥ दृष्ट्वातुदेविकुपितंभ्रुकुटीकरालमुद्य
च्छशांकसदृशच्छवियन्नसद्यः॥ प्राणान्मु
मोचमहिषस्तदतीवचित्रं कैर्जीव्यतेहिकु
पितांतकदर्शनेन ॥ १३ ॥ देविप्रसीदपरमा
भवतीभवायसद्यो विनाशयसि कोपवती
कुलानि॥ विज्ञातमेतदधुनैवयदस्तमेतन्नी

तंवलंसुविपुलंमहिषासुरस्य॥१४॥तेसंम
७३ ता जनपदेषुधनानितेषांतेषांयशांसिनच
सीदतिधर्मवर्गः।धन्यास्तएवनिभृतात्मज
भृत्यदारायेषांसदाभ्युदयदाभवती प्रसन्ना
॥ १५ ॥ धर्म्याणिदेविसकलानिसदैवक
र्माण्यत्यादृतः प्रतिदिनं सुकृतीकरोति॥ ७३
स्वर्गंप्रयातिचततोभवतीप्रसादाल्लोकत्रये

पिफलदाननुदेवितेन ॥ १६ ॥दुर्गेस्मृताह
रसिभीतिमशेषजंतोःस्वस्थैः स्मृतामतिम
तीवशुभांददासि ॥ दारिद्रदुःखभयहारि
णिकात्वदन्या सर्वोपकारकरणाय सदार्द्र
चित्ता ॥ १७॥ एभिर्हतैर्जगदुपैतिसुखंतथै
तेकुर्वंतुनामनरकायाचिरायपापं ॥ संग्राम
मृत्युमधिगम्यदिवं प्रयांतुमत्वेतिनूनमहि

तान्विनिहंसिदेवि॥१८॥दृष्ट्वैवकिंनभवती
प्रकरोति भस्मसर्वासुरानरिषुयत्प्रहिणोषि
शस्त्रं॥ लोकान्प्रयांतुरिपवोऽपिहिशस्त्रपूता
इत्थंमतिर्भवतितेष्वहितेषु साध्वी॥ १९ ॥
खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः शूलाग्र
कांतिनिवहेनदृशोऽसुराणाम्॥ यन्नागता
विलयमंशुमदिंदुखंडयोग्याननं तववि
लो

कयतांतदेतत्॥२०॥ दुर्वृत्तवृत्तशमनंतवदे
विशीलंरूपंतथैतदविचिंत्यमतुल्यमन्यैः।
वीर्यंचहंतृहृतदेवपराक्रमाणांवैरिष्वपिप्र
कटितैवदयात्वयेत्थम्॥२१॥केनोपमाभ
वतुतेऽस्यपराक्रमस्य रूपंचशत्रुभयकार्य
तिहारिकुत्र॥ चित्तेकृपासमरनिष्ठुरताचदृ
ष्टात्वय्येवदेविवरदेभुवनत्रयेऽपि॥२२॥

त्रैलोक्यमेतदखिलंरिपुनाशनेनत्रातंत्वया
समरसूर्धनितेपिहत्वा॥ नीतादिवंरिपुगणा
भयमप्यपास्तमस्माकमुन्मदसुरारिभवंन
मस्ते॥ २३ ॥ शूलेनपाहिनोदेविपाहिख
ड्गेनचाम्बिके॥ घण्टास्वनेननःपाहिचाप
ज्यानिःस्वनेनच॥ २४ ॥प्राच्यांरक्षप्रती
च्यांचचण्डिकेरक्ष दक्षिणे॥ भ्रामणेनात्म

शूलस्यउत्तरस्यांतथेश्वरि॥ २५॥ सौम्या
नियानिरूपाणित्रैलोक्येविचरंतिते ॥ या
निचात्यर्थघोराणितैरक्षास्मांस्तथाभुवम्
॥ २६ ॥ खड्गशूलगदादीनियानिचास्त्राणि
तेऽम्बिके ॥ करपल्लवसंगीनितैरस्मान्रक्षस
र्वतः॥२७॥ ऋषिरुवाच ॥२८ ॥ एवंस्तुता
सुरैर्दिव्यैः कुसुमैर्नंदनोद्भवैः ॥ अर्चिताजग

श० तांधात्रीतथागंधानुलेपनैः॥ २९॥ भक्त्या अ०४
७६ समस्तैस्त्रिदशैर्दिव्यैर्धूपैःसुधूपिता॥ प्राहप्र
सादसुमुखीसमस्तान्प्रणतांसुरान्॥ ३०॥
देव्युवाच॥ ३१॥ व्रियतां त्रिदशाः सर्वेय
दस्मत्तोऽभिवांछितम्॥ ३२॥ देवा ऊचुः
॥ ३३॥ भगवत्याकृतंसर्वंनकिंचिदवशि ७६
ष्यते॥ यदयंनिहतःशत्रुरस्माकंमाहिषासुरः

॥ ३४ ॥ यदिचापिवरोदेयस्त्वयास्माकंम
हेश्वरि॥ संस्मृतासंस्मृतात्वंनोहिंसेथाः पर
मापदः।३५।यश्चमर्त्यःस्तवैरेभिस्त्वांस्तो
ष्यत्यमलानने ॥ तस्यावित्तर्द्धिविभवैर्धन
दारादिसंपदाम्॥ ३६ ॥ वृद्धयेऽस्मत्प्रसन्ना
त्वंभवेथाः सर्वदाम्बिके॥ ३७॥ऋषिरुवाच
॥३८॥इतिप्रसादितादेवैर्जगतोऽर्थेतथात्म

नः ॥ तथेत्युक्त्वाभद्रकालीबभूवांतर्हिता
नृप ॥ ३९ ॥ इत्येतत्कथितंभूपसंभूतासाय
थापुरा ॥ देवीदेवशरीरेभ्योजगत्त्रयहितैषि
णी ॥४० ॥ पुनश्चगौरीदेहात्सासमुद्भूताय
थाभवत् ॥ वधायदुष्टदैत्यानांतथाशुंभनि ७७
शुंभयोः ॥ ४१ ॥ रक्षणायचलोकानांदे
वानामुपकारिणी ॥ तच्छृणुष्वमयाख्यातं

यथावत्कथयामिते॥४२॥इतिश्रीमार्कण्डे
यपुराणेसावर्णिकेम० देवीमा० शक्रादि
स्तुतिर्नामचतुर्थोध्यायः॥४॥उवाच॥५॥
अर्द्ध॥२॥ श्लोकाः॥ ३६ ॥ एवं॥ ४२॥
एवमादितः॥ २५९ ॥ उत्तमचरितस्य रु
द्रऋषिः॥महासरस्वती देवता॥ अनुष्टुप्छं
दः॥भीमाशक्तिः॥भ्रामरीबीजम्॥ सूर्यस्त

स० त्वं॥सामवेदःस्वरूपं॥महासरस्वतीप्रीत्य अ० ५
७८ र्थेउत्तमचरितजपेविनियोगः ॥ घण्टाशूल
हलानिशंखमुसलेचक्रंधनुः सायकं हस्ता
ब्जैर्दधतीं घनांतविलसच्छीतांशुतुल्यप्र
भाम् ॥ गौरीदेहसमुद्भवांत्रिनयनामाधार
भूतां महापूर्वामत्रसरस्वतीमनुभजेच्छुंभा ७८
दिदैत्यार्दिनीम् ॥ ऋषिरुवाच ॥ १ ॥ पुरा

शुंभनिशुंभाभ्यामसुराभ्यांशचीपतेः ॥ त्रै
लोक्यं यज्ञभागाश्च हतामदबलाश्रयात्
॥ २ ॥ तावेवसूर्यतांतद्वदाधिकारंतथैंदव
म्॥ कौबेरमथयाम्यंचचक्रातेवरुणस्यच
॥३॥ तावेवपवनर्द्धिंचचक्रतुर्वह्निकर्मच॥
ततोदेवाविनिर्धूताभ्रष्टराज्याः पराजिताः
॥ ४॥ हताधिकारास्त्रिदशास्ताभ्यांसर्वैनि

स अ० राक्रुता: ॥ महासुराभ्यांतांदेवींसंस्मरंत्यप अ०
५ ७२ राजिताम् ॥ ५ ॥ तयास्माकंवरोदत्तोयथा
पत्सुस्मृताखिला: ॥ भवतांनाशयिष्यामि
तत्क्षणात्परमापद: ॥ ६ ॥ इतिकृत्वामतिंदे
वाहिमवंतंनगेश्वरम् ॥ जग्मुस्तत्रततोदेवीं
विष्णुमायांप्रतुष्टुवु:॥७॥देवा ऊचु: ॥ ८ ॥ ७१
नमोदेव्यैमहादेव्यैशिवायैसततंनम: ॥ न

मः प्रकृत्यै भद्रायै नियताः प्रणताः स्मता
म ॥ ९ ॥ रौद्रायैनमोनित्यायैगौर्य्यैधात्र्यै
नमोनमः ॥ ज्योत्स्नायैचेंदुरूपिण्यैसुखा
यैसततंनमः ॥ १० ॥ कल्याण्यैप्रणतांवृ
द्ध्यै सिद्ध्यैकूर्म्यैनमोनमः ॥ नैर्ऋत्यैभूभृ
तांलक्ष्म्यैशर्वाण्यैतेनमोनमः ॥ ११ ॥ दुर्गा
यैदुर्गपारायैसारायैसर्वकारिण्यै ॥ ख्यात्यै

तथैवकृष्णायैधूम्रायै सततंनमः॥ १२॥अ
तिसौम्यातिरौद्रायैनतास्तस्यै नमोनमः॥
नमोजगत्प्रतिष्ठायै देव्यै कृत्यै नमोनमः
॥ १३॥ या देवी सर्वभूतेषु विष्णुमायेति
शब्दिता॥नमस्तस्यै ॥ १४॥ नमस्तस्यै
॥ १५॥ नमस्तस्यैनमोनमः॥ १६ ॥ या
देवीसर्वभूतेषुचेतनेत्यभिधीयते॥ नमस्त

स्यै ॥ १७॥ नमस्तस्यै ॥ १८ ॥ नमस्त
स्यैनमोनमः ॥ १९ ॥ यादेवीसर्वभूतेषु
बुद्धिरूपेणसंस्थिता ॥ नमस्तस्यै ॥ २० ॥
नमस्तस्यै ॥ २१ ॥ नमस्तस्यै नमो नमः
॥ २२ ॥ यादेवीसर्वभूतेषु निद्रारूपेण
संस्थिता ॥ नमस्तस्यै ॥ २३ ॥ नम
स्तस्यै ॥ २४ ॥ नमस्तस्यै नमो नमः

॥ २५ ॥ यादेवीसर्वभूतेषुक्षुधारूपेणसं
८१ स्थिता ॥ नमस्तस्यै ॥ २६ ॥ नमस्तस्यै
॥ २७ ॥ नमस्तस्यैनमोनमः ॥ २८ ॥ यादे
वीसर्वभूतेषुच्छायारूपेणसंस्थिता ॥ नम
स्तस्यै ॥ २९ ॥ नमस्तस्यै ॥ ३० ॥ नम
स्तस्यै नमोनमः ॥ ३१ ॥ यादेवीसर्वभूतेषु ८१
शक्तिरूपेणसंस्थिता ॥ नमस्तस्यै ॥ ३२ ॥

नमस्तस्यै ॥ ३३ ॥ नमस्तस्यै नमो नमः
॥ ३४ ॥ यादेवीसर्वभूतेषुतृष्णारूपेणसं
स्थिता ॥ नमस्तस्यै ॥ ३५ ॥ नमस्तस्यै
॥ ३६ ॥ नमस्तस्यैनमोनमः ॥ ३७ ॥ या
देवीसर्वभूतेषुक्षांतिरूपेणसंस्थिता ॥ नम
स्तस्यै ॥ ३८ ॥ नमस्तस्यै ॥ ३९ ॥ नम
स्तस्यैनमोनमः ॥ ४० ॥ यादेवीसर्वभूतेषु

जातिरूपेणसंस्थिता ॥ नमस्तस्यै॥ ४१॥
नमस्तस्यै ॥ ४२ ॥ नमस्तस्यै नमो नमः
॥ ४३ ॥ यादेवीसर्वभूतेषुलज्जारूपेणसं
स्थिता ॥ नमस्तस्यै ॥ ४४ ॥ नमस्तस्यै
॥ ४५ ॥ नमस्तस्यै नमोनमः ॥ ४६ ॥ या
देवीसर्वभूतेषुशांतिरूपेणसंस्थिता ॥ नम
स्तस्यै ॥४७॥नमस्तस्यै ॥ ४८ ॥ नमस्त

स्यैनमोनमः ॥ ४९ ॥ यादेवीसर्वभूतेषु श्र
द्धारूपेणसंस्थिता॥नमस्तस्यै॥५०॥नम
स्तस्यै॥५१॥नमस्तस्यै नमोनमः ॥५२॥
यादेवीसर्वभूतेषु कांतिरूपेण संस्थिता ॥
नमस्तस्यै॥५३॥नमस्तस्यै ॥ ५४ ॥ न
मस्तस्यैनमोनमः॥ ५५ ॥यादेवीसर्वभूते
षु लक्ष्मीरूपेण संस्थिता ॥ नमस्तस्यै

स० ॥५६॥नमस्तस्यै॥५७॥नमस्तस्यै नमो अ० ५
८३ नमः॥५८॥यादेवीसर्वभूतेषुवृत्तिरूपेण
संस्थिता॥नमस्तस्यै॥५९॥नमस्तस्यै
॥६०॥नमस्तस्यैनमोनमः॥६१॥या
देवीसर्वभूतेषुस्मृतिरूपेणसंस्थिता॥नम
स्तस्यै॥६२॥नमस्तस्यै॥६३॥नम ८३
स्तस्यैनमोनमः॥६४॥यादेवीसर्वभूतेषु

दयारूपेणसंस्थिता ॥ नमस्तस्यै ॥ ६५ ॥
नमस्तस्यै ॥ ६६ ॥ नमस्तस्यैनमोनमः
॥ ६७ ॥ यादेवीसर्वभूतेषुतुष्टिरूपेणसंस्थि
ता ॥ नमस्तस्यै ॥ ६८ ॥ नमस्तस्यै ॥ ६९ ॥
नमस्तस्यैनमोनमः ॥ ७० ॥ यादेवीसर्वभूते
षुमातृरूपेणसंस्थिता ॥ नमस्तस्यै ॥ ७१ ॥
नमस्तस्यै ॥ ७२ ॥ नमस्तस्यै नमो नमः

स० ॥ ७३ ॥ यादेवीसर्वभूतेषु श्रांतिरूपेणसं अ०५
८४ स्थिता ॥ नमस्तस्यै ॥ ७४ ॥ नमस्तस्यै
॥७५॥नमस्तस्यैनमोनमः॥७६ ॥इंद्रिया
णामधिष्ठात्रीभूतानांचाखिलेषुया ॥ भूते
षुसततंतस्यैव्याप्त्यैदेव्यैनमोनमः ॥७७॥
चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता ८४
जगत् ॥ नमस्तस्यै ॥ ७८ ॥ नमस्तस्यै

॥ ७९ ॥ नमस्तस्यैनमोनमः ॥ ८० ॥ स्तु
ता सुरैः पूर्वमभीष्टसंश्रयात्तथासुरेंद्रेणदिने
षुसेविता ॥ करोतुसानः शुभहेतुरीश्वरी शु
भानिभद्राण्यभिहंतुचापदः ॥८१॥ यासां
प्रतं चोद्धतदैत्यतापितैरस्माभिरीशाचसुरै
र्नमस्यते ॥ याचस्मृतातत्क्षणमेवहन्तिनः
सर्वापदोभक्तिविनम्रमूर्तिभिः ॥ ८२ ॥

स० ऋषिरुवाच ॥८३॥ एवंस्तवादियुक्तानांदे अ०५
८२ वानांतत्रपार्वती ॥ स्नातुमभ्याययौतोये
जाह्नव्यानृपनंदन॥ ८४ ॥ साब्रवीत्तान्सु
रान्सुभ्रूर्भवद्भिःस्तूयतेऽत्रका ॥ शरीरकोश
तश्चास्याःसमुद्भूताब्रवीच्छिवा ॥ ८५ ॥ ८८
स्तोत्रंममैतत्क्रियतेशुंभदैत्यनिराकृतैः ॥ दे
वैः समेतैः समरेनिशुंभेनपराजितैः ॥८६॥

शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताम्बि
का ॥ कौशिकीतिसमस्तेषुततो लोकेषुगी
यते ॥ ८७ ॥ तस्यांविनिर्गतायांतुकृष्णा
भूत्सापिपार्वती ॥ कौशिकेतिसमाख्याता
हिमाचलकृताश्रया ॥८८॥ ततोऽम्बिकां
परंरूपंबिभ्राणांसुमनोहरम्॥ ददर्शचंडोमुं
डश्चभृत्यौशुंभनिशुंभयोः॥८९॥ताभ्यांशुं

भाय चाख्याताअतीवसुमनोहरा॥काप्या
स्तेस्त्रीमहाराजभासयंतीहिमाचलं॥१०॥
नैवताहृक्क्वचिद्रूपंदृष्टंकेनचिदुत्तमं।ज्ञाय
तांकाप्यसौदेवीगृह्यतांचासुरेश्वर ॥११॥
स्त्रीरत्नमतिचार्वंगी द्योतयंती दिशस्त्वि
षा॥सातुतिष्ठतिदैत्येंद्रतांभवान्द्रष्टुमर्हति
॥ १२ ॥ यानिरत्नानिमणयोगजाश्वादी

निवेप्रभो ॥ त्रैलोक्ये तु समस्तानि सांप्रतं
भांतितेगृहे॥१३॥ ऐरावतःसमानीतोगज
रत्नंपुरन्दरात् ॥ पारिजाततरुश्चायंतथैवो
च्चैःश्रवाहयः॥१४॥ विमानंहंससंयुक्तमेत
त्तिष्ठतितेऽगणे॥ रत्नभूतामिहानीतंयदासी
द्वेधसोऽद्भुतम् ॥ १५ ॥ निधिरेषमहापद्मः स
मानीतोधनेश्वरात् ॥ किंजल्किनींददौचा

व्यमालामम्लानपंकजाम्॥ १६ ॥छत्रंते ०
वारुणंगेहेकांचनस्साावितिष्ठति।तथायंस्यं ७
दनवरोयःपुरासीत्प्रजापतेः॥१७॥ मृत्योरु
त्क्रांतिदानामशक्तिरीशत्वयाहृता॥पाशः
सलिलराजस्यभ्रातुस्तवपरिग्रहे।१८। नि
शुंभस्याब्धिजाताश्च समस्ता रत्नजातयः ८७
॥ वह्निरपि ददौतुम्यमग्निशौचे च वाससी

॥९९॥ एवंदैत्येंद्ररत्नानिसमस्तान्याहृता
नितेे॥ स्त्रीरत्नमेषाकल्याणित्वयाकस्मान्न
गृह्यते॥१००॥ऋषिरुवाच॥ १ ॥निशम्ये
तिवचःशुंभः सतदाचंडमुंडयोः॥ प्रेषयामा
ससुग्रीवंदूतंदेव्यामहासुरम् ॥२॥ इतिचेति
चवक्तव्यासागत्वावचनान्मम ॥ यथाचा
भ्येतिसंप्रीत्यातथाकार्यंत्वयालघु ॥ ३ ॥

स तत्र गत्वा यत्रास्ते शैलोद्देशेऽतिशोभने ॥
८८ सा देवी तां ततः प्राह श्लक्ष्णं मधुरया गिरा
॥ ४ ॥ दूत उवाच ॥ ५ ॥ देवि दैत्येश्वरः शुंभ
स्त्रैलोक्ये परमेश्वरः ॥ दूतोऽहं प्रेषितस्तेन त्व
त्सकाशमिहागतः ॥ ६ ॥ अव्याहताज्ञः
सर्वासु यः सदा देवयोनिषु ॥ निर्जिताखिलदै ८९
त्यारिः स यदाह शृणुष्व तत् ॥ ७ ॥ मम त्रैलो

कथमखिलंममदेवावशानुगाः॥यज्ञभागा
नहंसर्वानुपाश्नामिपृथक्पृथक्॥ ८॥ त्रै
लोक्येवररत्नानिममवश्यान्यशेषतः॥ त
थैवगजरत्नंचहृतंदेवेंद्रवाहनम्॥९॥ क्षिरो
दमथनोद्भूतमश्वरत्नंममामरैः॥ उच्चैःश्रव
ससंज्ञंतत्प्रणिपत्यसमर्पितम्॥ १०॥ या
निचान्यानिदेवेषुगंधर्वेषूरगेषुच॥ रत्नभू

श० तानि भूतानितानिमय्येवशोभने ॥ ११ ॥ अ० ५
८९ स्त्रीरत्नभूतांत्वांदेवि लोकेमन्यामहेवयं ॥
सात्वमस्मानुपागच्छ यतोरत्नभुजोवयम्
॥ १२ ॥ मांवाममानुजंवापिनिशुंभमुरुवि
क्रमम् ॥ भजत्वंचंचलापांगिरत्नभूतासिवै
यतः ॥ १३ ॥ परमैश्वर्यमतुलंप्राप्स्यसेम ८९
त्परिग्रहात् ॥ एतद्बुद्ध्यासमालोकयमत्पारि

ग्रहतांव्रज ॥ १४ ॥ ऋषिरुवाच ॥ १५ ॥
इत्युक्त्वासातदादेवीगंभीरांतःस्मिताजगौ ॥
दुर्गाभगवतीभद्राययेदंधार्यतेजगत् १६ ॥
देव्युवाच ॥ १७ ॥ सत्यमुक्तंत्वयानात्रमि
थ्याकिंचित्त्वयोदितं ॥ त्रैलोक्याधिपतिः
शुंभोनिशुंभश्चापिताहृशः ॥ १८ ॥ किंत्वत्र
यत्प्रतिज्ञातंमिथ्यातत्क्रियतेकथम् ॥ श्रूय

तामल्पबुद्धित्वात्प्रतिज्ञायाकृतापुरा १९ ॥
योमांजयति संग्रामे योमेदर्पं व्यपोहति ॥
योमेप्रतिबलोलोके समे भर्ता भविष्यति
॥ २० ॥ तदागच्छतुशुंभोऽत्रानिशुंभोवाम
हासुरः ॥ मांजित्वाकिंचिरेणात्रपाणिंगृह्णा
तुमेलघु॥२१॥दूतउवाच ॥ २२ ॥ अवलि १०
प्तासिमैवंत्वंदे विब्रूहिममग्रातः ॥ त्रैलोक्ये

कःपुमांस्तिष्ठेदग्रेशुंभनिशुंभयोः ॥ २३ ॥
अन्येषामपि दैत्यानां सर्वे देवा न वै युधि ॥
तिष्ठंति संमुखे देवि किं पुनः स्त्रीत्वमेकिका
॥ २४॥ इंद्राद्यास्सकलादेवास्तस्थुर्येषांन
संयुगे ॥ शुंभादीनांकथंतेषांस्त्रीप्रयास्यसि
संमुखम् ॥२५ ॥ सात्वंगच्छमयैवोक्तापा
र्श्वंशुंभनिशुंभयोः॥ केशाकर्षणनिर्धूतगौर

वामागमिष्यसि ॥ २६॥ देव्युवाच॥२७॥
एवमेतद्बली शुंभो निशुंभश्चातिवीर्यवान् ॥
किंकरोमि प्रतिज्ञा मे यदनालोचिता पुरा
॥ २८ ॥ सत्वंगच्छ मयोक्तं ते यदेतत्सर्वमा
हतः॥ तदाचक्ष्वासुरेंद्राय स च युक्तं करोतु त
त् ॥ १२९ ॥ इतिमार्कण्डेयपुराणे सा
वर्णिकेमन्वंतरे देवीमाहात्म्ये देव्यादूतसं

वादोनामपंचमोऽध्यायः ॥ ५ ॥ उवाच ॥
॥ १ ॥ खंडानि ॥ ६६ ॥ श्लोक ॥ ५४ ॥
॥ एवं ॥ १२१ ॥ एवमादितः ॥ ३८८ ॥
ऋषिरुवाच ॥ १ ॥ इत्याकर्ण्यवचोदेव्याः
सदूतोमर्षपूरितः ॥ समाचष्टसमागम्यदैत्य
राजायविस्तरात् ॥ २ ॥ तस्यदूतस्यतद्वा
क्यमाकर्ण्यासुरराट्ततः ॥ सक्रोधः प्राहदै

स० त्यानामधिपंधूम्रलोचनम् ॥ ३ ॥ हेधूम्रलो अ० ६
९२ चनाशुत्वंस्वसैन्यपरिवारितः। तामानयब
लाद्दुष्टांकेशाकर्षणविह्वलां॥ ४॥ तत्परित्रा
णदः कश्चिद्यदिवोत्तिष्ठतेपरः॥ सहंतव्योऽम
रोवापियक्षोगंधर्वएववा॥ ५ ॥ ऋषिरुवाच
॥ ६ ॥ तेनाज्ञप्तस्ततः शीघ्रंसदैत्योधूम्रलोच ९२
नः॥ वृतः षष्ट्यासहस्राणामसुराणांद्रुतंय

यौ ॥ ७ ॥ सदृष्ट्वातांततोदेवींतुहिनाचलसं
स्थिताम् ॥ जगादोच्चैः प्रयाहीतिमूलंशुंभनि
शुंभयोः ॥ ८ ॥ नचेत्प्रीत्याद्यभवतीमद्भर्तार
मुपैष्यति ॥ ततोबलान्नयाम्येषकेशाकर्षण
विह्वलाम् ॥ ९ ॥ देव्युवाच ॥ १० ॥ दैत्येश्वरे
णप्रहितोबलवान्बलसंवृतः ॥ बलान्नयसि
मामेवंततः किंतेकरोम्यहम् ॥ ११ ॥ ऋ

सा० पिरुवाच॥ १२ ॥ इत्युक्तःसोऽभ्यधाव अ० ६
९३ त्तामसुरोधूम्रलोचनः ॥ हुंकारेणैवतंभस्म
साचकाराम्बिकाततः॥ १३॥ अथक्रुद्धंमहा
सैन्यमसुराणांतथाम्बिका ॥ ववर्षसायकै
स्तीक्ष्णैस्तथाशक्तिपरश्वधैः ॥ १४ ॥ततो
धुतसटःकोपात्कृत्वानादंसुभैरवम्॥पपाता ९३
सुरसेनायांसिंहोदेव्याःस्ववाहनः ॥ १५ ॥

कांश्चित्करप्रहारेणदैत्यानास्येनचापरान्॥
आक्रान्त्याचाधरेणान्यान्सजघानमहासु
रान्॥ १६ ॥ केषांचित्पाटयामास नखैः
कोष्ठानिकेसरी॥तथातलप्रहारेणशिरांसि
कृतवान्पृथक्॥ १७ ॥ विच्छिन्नबाहुशिर
सःकृतास्तेनतथापरे॥ पपौचरुधिरंकोष्ठा
दन्येषांधुतकेसरः॥ १८ ॥क्षणेनतद्बलंस

स० वैंक्षयंनीतंमहात्मना ॥ तेनकेसरिणादेव्या अ० ६
१४ वाहनेनातिकोपिना॥ १९॥ श्रुत्वातमसुरंदे
व्यानिहतंधूम्रलोचनम् ॥ बलंचक्षयितंकु
त्स्नंदेवीकेसरिणाततः॥ २०॥ चुकोपदैत्या
धिपतिःशुंभःप्रस्फुरिताधरः ॥ आज्ञापया
मासचतौचंडमुंडौमहासुरौ॥ २१ ॥हेचंड १४
हेमुंडबलैर्बहुभिः परिवारितौ॥ तत्रगच्छत

गत्वाचसासमानीयतांलघु ॥ २२ ॥ केशे
ष्वाकृष्यबद्ध्वावायदिवःसंशयोयुधि ॥ तदा
शेषायुधैः सर्वैरसुरैर्विनिहन्यताम् ॥ २३ ॥
तस्यांहतायांदुष्टायांसिंहेचविनिपातिते ॥
शीघ्रमागम्यतांबद्ध्वागृहीत्वातामथांबिका
म् ॥ २४ ॥ इति मार्कण्डेयपुराणेसावर्णिके
मन्वंतरेदेवीमाहात्म्येधूम्रलोचनवधो ना

मपष्ठोऽध्यायः॥६॥ उवाच ॥ ४ ॥ अर्ध ॥
॥ ० ॥ श्लोक॥ २० ॥ एवं॥ २४ ॥ एव
मादितः॥ ४१२ ॥ ऋषिरुवाच ॥ १ ॥ आ
ज्ञप्तास्तेततोदैत्याश्चंडमुंडपुरोगमाः ॥ चतु
रंगबलोपेताययुरभ्युद्यतायुधाः ॥२॥ दद
शुस्तेततोदेवीमीषद्धासांव्यवस्थिताम् ॥
सिंहस्योपरिशैलेंद्रशृंगेमहतिकांचने॥३॥

तेदृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः ॥
आकृष्टचापासिधरास्तथान्ये तत्समीप
गाः ॥ ४ ॥ ततःकोपंचकारोच्चैरंबिकाता
नरीन्प्रति ॥ कोपेनचास्यावदनंमषीवर्ण
मभूत्तदा ॥ ५ ॥ भ्रुकुटीकुटिलात्तस्याल
लाटफलकाद्द्रुतं ॥कालीकरालवदनाविनि
ष्कांतासिपाशिनी ॥ ६ ॥ विचित्रखट्वांगध

स० रानरमालाविभूषणा ॥ द्वीपिचर्मपरीधाना अ०
९६ शुष्कमांसातिभैरवा ॥ ७ ॥ अतिविस्तारव
दना जिह्वाललनभीषणा ॥ निमग्नारक्तनय
नानादापूरितदिङ्मुखा ॥ ८ ॥ सावेगेनाभि
पतिता घातयन्ती महासुरान् ॥ सैन्ये तत्र
सुरारीणामभक्षयत तद्बलम् ॥ ९ ॥ पार्ष्णिग्रा ९६
हांकुशग्राहयोधघंटासमन्वितान् ॥ समा

दायैकहस्तेनमुखेचिक्षेपवारणान् ॥ १० ॥
तथैवयोधंतुरगैरथंसारथिनासह ॥ निक्षि
प्यवक्त्रेदशनैश्चर्वयंत्यतिभैरवम्॥ ११॥ए
कंजग्राहकेशेषुग्रीवायामथचापरं ॥पादेना
क्रम्यचैवान्यमुरसान्यमपोथयत् ॥ १२ ॥
तैर्मुक्तानिचशस्त्राणिमहास्त्राणितथासुरैः॥
मुखेनजग्राहरुषादशनैर्मथितान्यपि १३॥

रा० वलिनांतद्बलंसर्वमसुराणांदुरात्मना॥मम पु० ७
र्दाभक्षयच्चान्यानन्यांश्चाताडयत्तदा १४
असिना निहताःकेचित्केचित्खट्वांगताडि
ताः॥ जग्मुर्विनाशमसुरादंताग्राभिहतास्त
था॥ १५ ॥क्षणेनतद्बलंसर्वमसुराणांनि
पातितं॥दृष्ट्वाचंडोऽभिदुद्रावतांकालीमति १७
भीषणां॥१६॥शरवर्षैर्महाभीमैर्भीमाक्षीं

तांमहासुरःछादयामासचक्रैश्चमुंडःक्षितैः
सहस्रशः ॥१७॥ तानिचक्राण्यनेकानिवि
शमानानितन्मुखं॥बभुर्यथार्कबिंबानिसुब
हूनिघनोदरं॥१८॥ततोजहासातिरुषाभी
मंभैरवनादिनी ॥ कालीकरालवक्त्रांतर्दुर्द
र्शदशनोज्ज्वला॥१९॥उत्थायचमहासिंहं
देवीचंडमधावत॥गृहीत्वाचास्यकेशेषुशि

श्लो० रस्तेनासिनाच्छिनत् ॥२०॥ अथमुंडोभ्य
१.८ धावत्तांदृष्ट्वाचंडंनिपातितं ॥ तमप्यपातय
द्भूमौ साखड्गाभिहतं रुषा ॥ २१ ॥ हतशेषं
ततः सैन्यंदृष्ट्वा चंडंनिपातितं ॥ मुंडंचसुम
हावीर्यंदिशोभेजेभयातुरम् ॥ २२ ॥ शिर
श्चंडस्यकालीचगृहीत्वामुण्डमेवच ॥ प्राह ९८
प्रचंडाट्टहासमिश्रमभ्येत्यचंडिकां ॥२३॥

मयातवात्रोपहृतौचंडमुंडौमहापशू ॥ युद्ध
यज्ञेस्वयंशुंभंनिशुंभंचहनिष्यसि ॥ २४ ॥
ऋषिरुवाच ॥२५॥ तावानीतौततोदृष्ट्वाचं
डमुंडौमहासुरौ ॥उवाचकालींकल्याणील
लितंचंडिकावचः ॥ २६ ॥ यस्माच्चंडंचमु
डंचगृहीत्वात्वमुपागता॥चामुंडेतिततोलो
केख्यातादेवी भविष्यसि ॥ २७ ॥ इतिमा

र्कण्डेयपुराणेसावर्णिकेमन्वंतरे देवीमाहा
त्म्ये चंडमुंडवधोनामसप्तमोऽध्यायः॥७॥
उवाच॥ २॥ श्लोक॥ २५॥ एवं॥ २७॥
एवमादितः॥ ४३९॥ ऋषिरुवाच॥ १॥
चंडेचनिहतेदैत्येमुंडेचाविनिपातिते॥बहुले
षुचसैन्येषुक्षयितेष्वसुरेश्वरः॥ २ ॥ततः
कोपपराधीनचेताः शुम्भः प्रतापवान्॥ उ

द्योगंसर्वसैन्यानांदैत्यानामादिदेशह ॥ ३॥
अद्यसर्वबलैर्दैत्याःषडशीतिरुदायुधाः॥ कं
बूनांचतुराशीतिर्नियांतुस्वबलैर्वृताः ॥४॥
कोटिवीर्याणिपंचाशदसुराणांकुलानिवै॥
शतं कुलानि धौम्राणां निर्गच्छन्तु ममाज्ञ
या ॥५॥ कालकादौर्हदामौर्याः कालकेया
स्तथासुराः॥ युद्धायसज्जानियांतुआज्ञया

त्वरितामम ॥ ६ ॥ इत्याज्ञाप्यासुरपतिः शु
म्भोभैरवशासनः ॥ निर्जगाममहासैन्यस
हस्रैर्बहुभिर्वृतः॥७॥ आयांतंचण्डिकादृष्ट्वा
तत्सैन्यमतिभीषणम् ॥ ज्यास्वनैः पूरया
मासधरणीगगनांतरम् ॥८॥ ततःसिंहोम
हानादमतीवकृतवान्नृप ॥ घण्टास्वनेनतं १००
नादमंबिकाचोपबृंहयत्॥ ९॥ धनुर्ज्यासिं

हघण्टानांनादापूरितांदिङ्मुखा ॥ निनादै
र्भीषणैःकालीजिग्येविस्तारितानना १०
तांनिनादमुपश्रुत्यदैत्यसैन्यैश्चतुर्दिशम् ॥ दे
वीसिंहस्तथा काली शरौघैः परिवारिताः
॥ ११॥ एतस्मिन्नंतरेभूपविनाशायसुरद्वि
षाम् ॥ भवायामरसिंहानामतिवीर्यबला
न्विताः ॥ १२ ॥ ब्रह्मेशगुहविष्णूनांतथेंद्र

स्यचशक्तयः ॥ शरीरेभ्योविनिष्क्रम्यतद्रू अ० ८
पैश्चण्डिकांययुः ॥ १३ ॥ यस्यदेवस्ययद्रू
पंयथाभूषणवाहनम् ॥ तद्वदेवहितच्छक्ति
रसुरान्योद्धुमाययौ ॥१४॥ हंसयुक्तविमा
नाग्रेसाक्षसूत्रकमंडलुः ॥ आयाताब्रह्मणः
शक्तिर्ब्रह्माणीसाभिधीयते ॥१५॥ माहेश्व १०१
रीवृषारूढात्रिशूलवरधारिणी ॥ महाहिव

लयाप्राप्ताचन्द्ररेखाविभूषणा ॥ १६॥कौ
मारीशक्तिहस्ताचमयूरवरवाहना ॥ योद्धु
मभ्याययौ दैत्यानंबिका गुहरूपिणी १७
तथैववैष्णवीशक्तिर्गरुडोपरिसंस्थिता ॥
शङ्खचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ
॥ १८ ॥ यज्ञवाराहमतुलंरूपंयाबिभ्रती
हरेः॥शक्तिःसाप्याययौतत्रवाराहींबिभ्रती

तनुम् ॥ १९ ॥ नारसिंहीनृसिंहस्यबिभ्र
तीसदृशंवपुः ॥ प्रासातत्रसटाक्षेपाक्षिप्तन
क्षत्रसंहतिः ॥ २० ॥ वज्रहस्तातथैवैंद्री
गजराजोपरिस्थिता॥ प्राप्तासहस्रनयना य
थाशक्रस्तथैवसा॥२१॥ ततः परिवृतस्ता
भिरीशानोदेवशक्तिभिः॥ हन्यन्तामसुराः
शीघ्रंममप्रीत्याहचंडिकाम् ॥ २२॥ ततोदे

वीशरीरात्तु विनिष्क्रांतातिभीषणा ॥ चंडि
काशक्तिरत्युग्राशिवाशतनिनादिनी २३ ॥
साचाहधूम्रजटिलमीशानमपराजिता ॥ दू
तत्वंगच्छभगवन्पार्श्वेशुंभनिशुंभयोः २४
ब्रूहिशुंभंनिशुंभंचदानवावातिगर्वितौ॥ येचा
न्येदानवास्तत्रयुद्धायसमुपास्थिताः २५॥
त्रैलोक्यमिंद्रोलभतांदेवाःसंतुहविर्भुजः ॥

स० यूयं प्रयात पातालं यदि जीवितुमिच्छथ अ०
१०३ ॥ २६ ॥ बलावलेपादथ चेद्भवन्तोयुद्धकां
क्षिणः ॥ तदागच्छत तृप्यंतुमच्छिवाः पि
शितेनवः॥२७॥ यतोनियुक्तोदौत्येनतया
देव्याशिवःस्वयं ॥ शिवदूतीतिलोकेऽस्मिं
स्ततःसाख्यातिमागता ॥ २८ ॥ तेऽपिश्रु १०३
त्वावचोदेव्याः शर्वाख्यातंमहासुराः ॥ अ

मर्षापूरिता जग्मुर्यत्र कात्यायनी स्थिता
॥ २९ ॥ ततः प्रथममेवाग्रेशरशक्त्यृष्टिवृ
ष्टिभिः ॥ ववर्षुरुद्धतामर्षास्तां देवीममरा
रयः ॥ ३० ॥ साचतान्प्रहितान्बाणाञ्छू
लशक्तिपरश्वधान् ॥ चिच्छेदलीलयाध्मा
तधनुर्मुक्तैर्महेषुभिः ॥ ३१ ॥ तस्याग्रतस्त
थाकालीशूलपातविदारितान् ॥ खट्वांगपो

थितांश्चारीन्कुर्वतीव्यचरत्तदा ॥ ३२ ॥ क
मंडलुजलाक्षेपहतवीर्यान्हतौजसः ॥ ब्रह्मा
णी चाऽकरोच्छत्रून्येन येन स्म धावति
॥ ३३ ॥ माहेश्वरीत्रिशूलेनतथाचक्रेणवै
ष्णवी ॥ दैत्याञ्जघानकौमारीतथाशक्त्या
तिकोपना ॥ ३४ ॥ ऐंद्रीकुलिशपातेनशत
शोदैत्यदानवाः ॥ पेतुर्विदारिताः पृथ्व्यांरु

धिरौघप्रवर्षिणः ॥ ३५ ॥ तुण्डप्रहारविध्व
स्तादंष्ट्राग्रक्षतवक्षसः ॥ वाराहमूर्त्यान्यपतं
श्चक्रेण चविदारिताः ॥ ३६ ॥ नखैर्विदारि
तांश्चान्यान्भक्षयंतीमहासुरान् ॥ नारसिंही
चचाराजौनादापूर्णदिगंबरा ॥ ३७ ॥ चंडा
ट्टहासैरसुराः शिवदूत्याभिदूषिताः ॥ पेतुः पृ
थिव्यांपतितांस्तांश्चखादाथसातदा ३८ ॥

इतिमातृगणंक्रुद्धंमर्दयंतंमहासुरान् ॥ दृष्ट्वा
१०५ भ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ॥ ३९ ॥
पलायनपरान्दृष्ट्वा दैत्यान्मातृगणार्दिता
न् ॥ योद्धुमभ्याययौक्रुद्धोरक्तबीजोमहा
सुरः ॥ ४० ॥ रक्तबिंदुर्यदाभूमौपतत्यस्य
शरीरतः ॥ समुत्पतातिमेदिन्यास्तत्प्रमाण १०६
स्तदासुरः ॥ ४१ ॥ युयुधेसगदापाणिरिंद्र

शक्त्यामहासुरः ॥ ततश्चैंद्रीस्ववज्रेणरक्त
बीजमताडयत् ॥४२ ॥ कुलिशेनाहतस्या
शुबहुसुस्रावशोणितं ॥ समुत्तस्थुस्ततोयो
धास्तद्रूपास्तत्पराक्रमाः ॥ ४३ ॥ यावंतः
पतितास्तस्यशरीराद्रक्तबिंदवः ॥ तावंतः
पुरुषाजातास्तद्वीर्यबलविक्रमाः ॥ ४४ ॥
तेचापियुयुधुस्तत्रपुरुषारक्तसंभवाः ॥ समं

मातृभिरत्युग्रशस्त्रपातातिभीषणम्॥४५॥ अ० ८
पुनश्चवज्रपातेनक्षतमस्याशिरोयदा ॥ववा
हरक्तंपुरुषास्ततोजातास्सहस्रशः॥ ४६ ॥
वैष्णवीसमरेचैनंचक्रेणाभिजघानह॥गद
यातडयामासऐंद्रीतमसुरेश्वरम् ॥४७॥ वै
ष्णवीचक्रभिन्नस्यरुधिरस्रावसंभवैः ॥स १०६
हस्रशोजगद्व्याप्तंतत्प्रमाणैर्महासुरैः॥४८॥

शक्त्याजघानकौमारी वाराहीच तथासि
ना ॥ माहेश्वरीत्रिशूलेनरक्तबीजंमहासुरम्
॥ ४९ ॥ सचापिगदयादैत्यः सर्वाएवाहन
त्पृथक् ॥ मातृः कोपसमाविष्टोरक्तबीजोम
हासुरः॥ ५० ॥तस्याहतस्यबहुधाशक्तिशू
लादिभिर्भुवि ॥ पपातयोवैरक्तौघस्तेनास
ञ्च्छतशोऽसुराः॥५१॥ तैश्चासुरासृक्संभू

श० तैरसुरैस्सकलंजगत्। व्याप्तमासीत्ततोदेवा अ० ८
१०७ भयमाजग्मुरुत्तमम् ॥ ५२॥ तान्विषण्णा
न्सुरान्दृष्ट्वाचंडिकाप्राहसत्वरा॥ उवाचका
लींचामुंडेविस्तीर्णंवदनंकुरु॥ ५३ ॥ म
च्छस्त्रपातसंभूतान्रक्तबिंदून्महासुरान् ॥
रक्तबिंदोःप्रतीच्छत्वं वक्त्रेणानेन वेगिना। १०७
॥ ५४ ॥ भक्षयंतीचररणेतदुत्पन्नान्महासु

रान् ॥ एवमेषक्षयंदैत्यःक्षीणरक्तोगमिष्य
ति ॥ ५५ ॥ भक्ष्यमाणास्त्वयाचोग्रानचो
त्पत्स्यंतिचापरे ॥इत्युक्त्वातां ततो देवीशू
लेनाभिजघानतं ॥५६॥ मुखेनकालीजगृ
हेरक्तबीजस्यशोणितं ॥ ततोसावाजघाना
थगदयातत्रचंडिकाम् ॥ ५७ ॥ नचास्या
वेदनांचक्रेगदापातोल्पिकामपि॥ तस्याह

स० तस्यदेहात्तुबहुसुस्रावशोणितम् ॥ ५८ ॥ म०८
१०८ यतस्ततस्तद्वक्त्रेणचामुंडासंप्रतीच्छति ॥
मुखे समुद्गता येस्यारक्तपातान्महासुराः
॥ ५९ ॥ तांश्चखादाथचामुंडापपौतस्यच
शोणितम् ॥ देवीशूलेनवज्रेणबाणैरसिभि
रिष्टिभिः॥६०॥ जघानरक्तबीजंतंचामुंडा १०८
पीतशोणितं ॥ सपपातमहीपृष्ठेशस्त्रसंघस

माहतः ॥ ६१ ॥ नीरक्तश्चमहीपालरक्तबी
जोमहासुरः ॥ ततस्तेहर्षमतुलमवापुस्त्रिद
शानृप ॥ ६२ ॥ तेषांमातृगणोजातोननर्ता
ऽसृङ्मदोद्धतः ॥ ६३ ॥ इतिमार्कण्डेय
पुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये
रक्तबीजवधोनाम अष्टमोऽध्यायः ॥ ८ ॥
॥ उवाच ॥ १ ॥ अर्ध ॥ १ ॥ श्लोक ॥

स० ॥ ६ १॥ एवं ॥ ६ ३॥ एवमादितः ॥५०२॥ अ० ९
१०२ राजोवाच ॥ १॥ विचित्रमिदमाख्यातं भग
वन्भवतामम ॥ देव्याश्चरितमाहात्म्यं रक्त
बीजवधाश्रितम् ॥२॥ भूयश्चेच्छाम्यहं श्रो
तुं रक्तबीजे निपातिते ॥ चकार शुंभो यत्कर्म
निशुंभश्चातिकोपनः ॥ ३ ॥ ऋषिरुवाच १०९
॥ ४ ॥ चकार कोपमतुलं रक्तबीजे निपातिते

॥ शुंभासुरो निशुंभश्च हतेष्वन्येषुचाहवे
॥५॥ हन्यमानंमहासैन्यंविलोक्यामर्षमु
द्वहन्॥ अभ्यधावन्निशुंभोथमुख्ययासुरसे
नया ॥ ६ ॥ तस्याग्रतस्तथापृष्ठपार्श्वयोश्च
महासुराः॥संदष्टौष्ठपुटाःक्रुद्धाहंतुंदेवीमुपा
ययुः ॥ ७ ॥ आजगाममहावीर्यः शुंभोऽपि
स्वबलैर्वृतः॥ निहंतुंचंडिकांकोपात्कृत्वायु

स० द्धंतुमातृभिः ॥ ८ ॥ ततोयुद्धमतीवासी अ० ९
११० देव्याः शुंभनिशुंभयोः ॥ शरवर्षमतीवोग्रं
मेघयोरिववर्षतोः ॥ ९ ॥ चिच्छेदाऽस्ता
ञ्छरांस्ताभ्यांचंडिकास्वशरोत्करैः ॥ ता
डयामासचांगेषुशस्त्रौघैरसुरेश्वरौ ॥ १० ॥
निशुंभोनिशितंखड्गंचर्मचादायसुप्रभम् ॥ ११०
अताडयन्मूर्ध्निसिंहं देव्यावाहनमुत्तमम्

॥ ११ ॥ ताडितेवाहनेदेवीक्षुरप्रेणासिमुत्तम
म् ॥ निशुंभस्याशुचिच्छेदचर्मचाप्यष्टचं
द्रकम् ॥ १२ ॥ छिन्नेचर्मणिखड्गेचशक्तिंचि
क्षेपसोसुरः ॥ तामप्यस्याद्विधाचक्रेचक्रेणा
भिमुखागतां ॥ १३ ॥ कोपाध्मातोनिशुंभो
थ शूलंजग्राहदानवः ॥ आयांतंमुष्टिपातेन
दैवीतच्चाप्यचूर्णयत्॥ १४ ॥ आविद्ध्या

स० थगदांसोऽपिचिक्षेपचंडिकांप्रति ॥सापिदे अ०
१११ व्यास्त्रिशूलेनभिन्नाभस्मत्वमागता॥ १५॥
ततःपरशुहस्तंतमायांतंदैत्यपुंगवम् ॥आह
त्यदेवीबाणौघैरपातयतभूतले ॥ १६ ॥
तस्मिन्निपतितेभूमौ निशुंभेभीमविक्रमे ॥
भ्रातर्यतीव संक्रुद्धः प्रययौ हंतुमंबिकाम् ११२
॥ १७॥ सरथस्थस्तथात्युच्चैर्गृहीतपरमा

युधैः ॥ भुजैरष्टाभिरतुलैर्व्याप्याशेषंबभौ
नभः॥ १८ ॥ तमायांतंसमालोक्य देवीशं
खमवादयत् ॥ ज्याशब्दंचापिधनुषश्चका
रातीव दुस्सहम् ॥ १९ ॥पूरयामासककुभो
निजघंटास्वनेनच ॥ समस्तदैत्यसैन्यानां
तेजोवधविधायिना॥ २० ॥ततःसिंहोमहा
नादैस्त्याजितेभमहामदैः ॥ पूरयामासगग

नंगांतथैवदिशोदश॥२१॥ ततःकालीसमु

त्पत्यगगनंक्ष्मामताडयत् ॥ कराभ्यांतन्नि
नादेनप्राक्स्वनास्तेतिरोहिताः।२२। अट्टा
ट्टहासमशिवंशिवदूतीचकारह ॥ तैःशब्दैर
सुरास्त्रेसुः शुंभः कोपंपरंययौ॥२३॥दुरात्मं
स्तिष्ठतिष्ठेतिव्याजहारांबिकायदा ॥ तदा

जयेत्यभिहितंदेवैराकाशसंस्थितैः॥२४॥

शुंभेनागत्ययाशक्तिर्मुक्ता ज्वालातिभीष
णा ॥आयांतीवह्निकूटाभासानिरस्तामहो
ल्कया ॥२५॥ सिंहनादेनशुंभस्यव्याप्तंलो
कत्रयांतरम् ॥ निर्घातनिःस्वनोघोरोजित
वानवनीपते॥२६॥ शुंभमुक्ताञ्छरान्देवी
शुंभस्तत्प्रहिताञ्छरान्॥ चिच्छेदस्वशरैरु
ग्रैः शतशोऽथसहस्रशः॥ २७॥ ततः साचं

स० डिकाक्रुद्धाशूलेनाभिजघानतम् ॥ सतदा अ० ९
११३ भिहतोभूमौमूर्छितोनिपपातह ॥ २८ ॥
ततोनिशुंभः संप्राप्यचेतनामात्तकार्मुकः॥
आजघान शरैर्देवीं कालीं केसरिणंतथा
॥ २९ ॥ पुनश्चकृत्वाबाहूनामयुतंदनुजेश्व
रः ॥चक्रायुधेनदितिजश्छादयामासचंडि ११२
काम्॥३०॥ततोभगवतीक्रुद्धादुर्गादुर्गार्ति

नाशिनी ॥ चिच्छेदतानिचक्राणिस्वशरैः
सायकांश्चतान् ॥ ३१ ॥ ततोनिशुंभोवेगेन
गदामादायचंडिकां ॥ अभ्यधावतवैहंतुं दै
त्यसेनासमावृतः ॥ ३२ ॥ तस्यापततएवाशु
गदांचिच्छेदचंडिका ॥ खड्गेनशितधारेण
सचशूलंसमाददे ॥ ३३ ॥ शूलहस्तंसमायां
तंनिशुंभममरार्दनम् ॥ हृदिविव्याधशूलेन

स० वेगाविद्धेनचंडिका ॥ ३४ ॥ भिन्नस्यतस्य अ० ९
११४ शूलेनहृदयान्निःसृतोऽपरः ॥ महाबलोमहा
वीर्यस्तिष्ठेतिपुरुषोवदन् ॥ ३५ ॥ तस्यनि
ष्क्रामतोदेवीप्रहस्यस्वनवत्ततः ॥ शिरश्चि
च्छेदखड्गेनततोऽसावपतद्भुवि ॥ ३६ ॥ त
तः सिंहश्चखादोग्रदंष्ट्राक्षुण्णशिरोधरान् ॥ ११४
असुरांस्तांस्तथा कालीशिवदूती तथापरा

न्। ३७। कौमारीशक्तिनिर्भिन्नाःकेचिन्नेशु
र्महासुराः ॥ ब्रह्माणीमन्त्रपूतेनतोयेनान्येनि
राकृताः ॥ ३८ ॥ माहेश्वरीत्रिशूलेनभिन्नाः
पेतुस्तथापरे ॥ वाराहीतुण्डघातेनकेचिच्चू
र्णीकृताभुवि ॥ ३९ ॥ खंडंखंडंचचक्रेणवै
ष्णव्यादानवाः कृताः ॥ वज्रेणचैन्द्रीहस्ता
ग्रविमुक्तेनतथापरे ॥ ४० ॥ केचिद्विनेशुर

सुराःकेचिन्नष्टामहाहवात्॥ भक्षिताश्चापरे
कालीशिवदूतीमृगाधिपैः ॥ ४१ ॥ इतिश्रीमा
र्कण्डेयपुराणे सावर्णिकेमन्वंतरे देवीमाहा
त्म्ये निशुंभवधोनामनवमोऽध्यायः ॥ ९ ॥
॥ उवाच ॥ २ ॥ श्लोक ॥ ३९ ॥ एवं ॥ ४१ ॥
एवमादितः ॥ ५४३ ॥ ऋषिरुवाच ॥ १ ॥
निशुंभंनिहतंदृष्ट्वाभ्रातरं प्राणसंमितम्॥ ह

न्यमानंबलंचैवशुंभःक्रुद्धोब्रवीद्वचः ॥ २ ॥
बलावलेपाद्दुष्टेत्वंमादुर्गेगर्वमावह ॥ अ
न्यासांबलमाश्रित्य युध्यसेयातिमानिनी
॥ ३ ॥ देव्युवाच ॥ ४ ॥ एकैवाहंजगत्यत्र
द्वितीयाकाममापरा॥पश्यैतादुष्टमय्येवावि
शंत्योमद्विभूतयः॥ ५ ॥ ऋषिरुवाच ॥ ६ ॥
ततः समस्तास्तादेव्योब्रह्माणीप्रमुखालय

स० म् ॥ तस्यादेव्यास्तनौजग्मुरेकैवासीत्तदां अ
११३ बिका ॥ ७ ॥ देव्युवाच ॥ ८ ॥ अहंविभूत्या
बहुभिरिहरूपैर्यदास्थिता ॥ तत्संहृतंमयैकै
वतिष्ठाम्याजौस्थिरोभव ॥ ९ ॥ ऋषिरुवा
च ॥ १० ॥ ततः प्रववृतेयुद्धंदेव्याः शुंभस्य
चोभयोः ॥ पश्यतांसर्वदेवानामसुराणांच ११६
दारुणम् ॥ ११ ॥ शरवर्षैःशितैःशस्त्रैस्तथा

स्त्रैश्चैवदारुणैः ॥ तयोर्युद्धमभूद्भूयःसर्वलो
कभयंकरं॥१२॥दिव्यान्यस्त्राणिशतशोमु
मुचेयान्यथांबिका॥ बभंजतानिदैत्येंद्रस्त
त्प्रतीघातकर्तृभिः ॥ १३॥ मुक्तानितेनचा
स्त्राणि दिव्यानि परमेश्वरी॥ बभंजलीलयै
वोग्रहुंकारोच्चारणादिभिः॥१४॥ततश्शरश
तैर्देवीमाच्छादयतसोऽसुरः॥सापितत्कुपि

श० तादेवीधनुश्चिच्छेदचेषुभिः ॥ १५ ॥ छिन्ने अ० १०
१७ धनुषिदैत्येंद्रस्तथाशक्तिमथाददे ॥ चिच्छे
ददेवीचक्रेणतामप्यस्यकरेस्थितां ॥ १६ ॥
ततःखड्गमुपादायशतचंद्रंचभानुमत् ॥ अ
भ्यधावत्तदादेवींदैत्यानामधिपेश्वरः १७ ॥
तस्यापततएवाशुखड्गंचिच्छेदचंडिका ॥ ११७
धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलम्

॥ १८ ॥ हताश्वःसतदादैत्यश्छिन्नधन्वा
विसारथिः ॥ जग्राहमुद्गरंघोरमंबिकानि
धनोद्यतः॥ १९ ॥ चिच्छेदापततस्तस्य
मुद्गरंनिशितैःशरैः ॥ तथापिसोऽभ्यधाव
त्तांमुष्टिमुद्यम्यवेगवान्॥ २० ॥ समुष्टिंपा
तयामासहृदयेदैत्यपुंगवः ॥ देव्यास्तंचा
पिसादेवीतलेनोरस्यताडयत् ॥२१ ॥तल

 प्रहाराभिहतोनिपपातमहीतले ॥ सदैत्य
 राजः सहसापुनरेवतथोत्थितः॥२२॥ उत्प
त्यचप्रगृह्योच्चैर्देवींगगनमास्थितः ॥ तत्रा
पिसानिराधारायुयुधेतेनचंडिका ॥ २३ ॥
नियुद्धंखे तदादैत्यश्चंडिकाचपरस्परम् ॥
चक्रतुः प्रथमं सिद्धमुनिविस्मयकारकम्
॥ २४ ॥ ततोनियुद्धंसुचिरंकृत्वातेनांबि

कासह ॥ उत्पाट्यभ्रामयामासचिक्षेपध
रणीतले ॥ २५ ॥ सक्षितोधरणींप्राप्यमु
ष्टिमुद्यम्यवेगतः ॥ अभ्यधावतदुष्टात्मा
चंडिकानिधनेच्छया ॥ २६ ॥ तमायांतं
ततोदेवीसर्वदैत्यजनेश्वरम् ॥ जगत्यांपात
यामासभित्वाशूलेनवक्षसि ॥ २७ ॥ सग
तासुः पपातोर्व्यांदेवीशूलाग्रविक्षतः ॥ चा-

४० लयन्सकला पृथ्वीं साब्धिद्वीपां सपर्वतां ३०
११९ ॥ २८ ॥ ततःप्रसन्नमखिलं हतेतस्मिन्दु
रात्मनि ॥ जगत्स्वास्थ्यमतीवापानिर्मलं
चाभवन्नभः ॥ २९ ॥उत्पातमेघास्सोल्का
येप्रागासंस्तेशमंययुः ॥ सरितोमार्गवाहि
न्यस्तथासंस्तत्रपातिते ॥ ३० ॥ ततोदे ११
वगणास्सर्वेहर्षनिर्भरमानसाः ॥ बभूवुर्नि

हतेतस्मिन्गंधर्वाललितंजगुः ॥ ३१ ॥ अ
वादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः ॥ व
वुः पुण्यास्तथा वातास्सुप्रभोऽभूद्दिवाकरः
॥ ३२ ॥ जज्वलुश्चाग्नयश्शांताः शांतादि
ग्जनितस्वनाः ॥ ३३ ॥ इतिमार्कण्डेयपु
राणेसावर्णिकेमन्वंतरेदेवीमाहात्म्ये शुंभ
वधोनामदशमोऽध्यायः॥ १०॥उवाच ५॥

स० ॥ अर्थ ॥ १ ॥ श्लोक ॥ ३७ ॥ एवं ॥ ३३ ॥ अ० ११
१२० पूवमानिक: ॥ ५७६ ॥ ऋषिरुवाच ॥ १ ॥
देव्याहते तत्र महासुरेन्द्रे सेन्द्राः सुरावह्निपु
रोगमास्ताम्॥ कात्यायनींतुष्टुवुरिष्टलाभा
द्विकाशिववक्त्राब्जाविकाशिताशाः ॥ २ ॥
देविप्रपन्नार्तिहरेप्रसीद प्रसीदमातर्जगतोऽ १२०
खिलस्य ॥ प्रसीद विश्वेश्वरि पाहि विश्वं

त्वमीश्वरीदेविचराचरस्य॥ ३ ॥आधारभू
ताजगतस्त्वमेकामहीस्वरूपेणयतः स्थि
तासि॥अपांस्वरूपस्थितयात्वयैतदाप्या
यतेकृत्स्नमलंघ्यवीर्ये॥ ४ ॥त्वंवैष्णवी
शक्तिरनंतवीर्याविश्वस्यबीजंपरमासिमा
या॥ संमोहितंदेविसमस्तमेतत्त्वंवैप्रसन्ना
भुविमुक्तिहेतुः॥ ५॥ विद्याः समस्तास्तव

स० देविभेदाः स्त्रियः समस्ताःसकलाजगत्सु ॥
२१ त्वयैकयापूरितमंबयैतत्काते स्तुतिःस्तव्य
परापरोक्तिः॥६॥ सर्वभूतायदादेवीस्वर्गमु
क्तिप्रदायिनी ॥ त्वंस्तुतास्तुतयेकावाभवं
तिपरमोक्तयः ॥ ७ ॥ सर्वस्यबुद्धिरूपेणज
नस्यहृदिसंस्थिते॥स्वर्गापवर्गदेदेविनारा
यणिनमोऽस्तुते॥८॥कलाकाष्ठादिरूपेण

परिणामप्रदायिनी ॥ विश्वस्योपरतौशक्ते
नारायणिनमोऽस्तुते॥९ ॥सर्वमंगलमांग
ल्येशिवेसर्वार्थसाधिके॥ शरण्येत्र्यंबकेगौ
रिनारायणिनमोऽस्तुते ॥ १० ॥ सृष्टिस्थि
तिविनाशानांशक्तिभूतेसनातनि॥ गुणाश्र
येगुणमयेनारायणिनमोऽस्तुते॥ ११ ॥ श
रणागतदीनार्तपरित्राणपरायणे॥ सर्वस्या

तिंहरेदेविनारायणिनमोऽस्तुते ॥ १२ ॥ हं
सयुक्तविमानस्थे ब्रह्माणीरूपधारिणि ॥
कौशांभःक्षरिकेदेवि नारायणिनमोऽस्तुते
॥ १३॥ त्रिशूलचंद्राहिधरेमहावृषभवाहि
नि ॥ माहेश्वरीस्वरूपेणनारायणिनमोस्तु
ते॥ १४ ॥मयूरकुक्कुटवृतेमहाशक्तिधरेनघे
॥ कौमारीरूपसंस्थानेनारायणिनमोस्तु

ते ॥ १५ ॥ शंखचक्रगदाशार्ङ्गगृहीतपरमायु
धे ॥ प्रसीदवैष्णवीरूपेनारायणिनमोस्तुते
॥ १६ ॥ गृहीतोग्रमहाचक्रेदंष्ट्रोद्धृतवसुंधरे
॥ वराहरूपिणिशिवेनारायणिनमोऽस्तुते
॥ १७ ॥ नृसिंहरूपेणोग्रेणहंतुंदैत्यान्कृतो
द्यमे ॥ त्रैलोक्यत्राणसहितेनारायणिनमोऽ
स्तुते ॥ १८ ॥ किरीटिनिमहावज्रेसहस्रन

श० यनोज्ज्वले ॥ वृत्रप्राणहरे चैंद्रि नारायणि अ० ११
२३ नमोऽस्तुते ॥ १९ ॥ शिवदूतीस्वरूपेणहत
दैत्यमहाबले ॥ घोररूपेमहारावेनारायणि
नमोऽस्तुते ॥ २० ॥ दंष्ट्राकरालवदनेशिरो
मालाविभूषणे । चामुंडेमुंडमथनेनारायणि
नमोस्तुते ॥ २१ ॥ लक्ष्मिलज्जेमहाविद्ये श्र १२२
द्धेपुष्टिस्वधेध्रुवे ॥ महारात्रिमहाविद्येनारा

यणिनमोऽस्तुते ॥ २२ ॥ मेधेसरस्वतिवरे
भूतिबाभ्रवितामसि ॥ नियतेत्वंप्रसीदेशे
नारायणिनमोऽस्तुते ॥ २३ ॥ सर्वस्वरूपे
सर्वेशे सर्वशक्तिसमन्विते ॥ भयेभ्यस्त्रा
हिनोदेविदुर्गेदेविनमोऽस्तुते॥२४॥ एतत्ते
वदनंसौम्यंलोचनत्रयभूषितम् ॥ पातुनः
सर्वभीतिभ्यःकात्यायनिनमोस्तुते॥२५॥

स० ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ॥ अ० ११
१२४ त्रिशूलंपातु नोभीतेर्भद्रकालि नमोऽस्तुते
॥ २६ ॥ हिनस्तिदैत्यतेजांसिस्वनेनापूर्य
याजगत् ॥ साघंटापातुनोदेविपापेभ्योनः
सुतानिव ॥२७॥ असुरासृग्वसापंकचर्चि
तस्तेकरोज्ज्वलः ॥शुभायखड्गोभवतुचंडि १२५
केत्वांनतावयम् ॥ २८ ॥रोगानशेषानपहं

सितुष्टा रुष्टातु कामान्सकलानभीष्टान् ॥
त्वामाश्रितानांनविपन्नराणांत्वामाश्रिता
ह्याश्रयतांप्रयांति ॥ २९ ॥ एतत्कृतंयत्क
दनंत्वयाद्य धर्मद्विषांदेविमहासुराणाम् ॥
रूपैरनेकैर्बहुधात्ममूर्तिं कृत्वाऽम्बिकेतत्प्र
करोतिकान्या ॥ ३० ॥ विद्यासुशास्त्रेषुवि
वेकदीपेष्वाद्येषुवाक्येषुचकात्वदन्या ॥म

स० मत्वगर्तेऽतिमहांधकारेविभ्रामयत्येतदती दु० ११
१२९ व विश्वम् ॥ ३१॥ रक्षांसियत्रोग्रविषाश्चना
गायत्रारयोदस्युबलानियत्र ॥दावानलोय
त्रतथाब्धिमध्येतत्रास्थितात्वं परिपासिवि
श्वम् ॥ ३२ ॥ विश्वेश्वरीत्वंपरिपासिविश्वं
विश्वात्मिकाधारयसीतिविश्वं ॥ विश्वेशवं १२९
द्याभवतीभवंतिविश्वाश्रयाये त्वयिभक्ति

नम्राः॥ ३३ ॥देविप्रसीदपरिपालयनोऽरि
भीतेर्नित्यंयथासुरवधादधुनैवसद्यः ॥ पा
पानिसर्वजगतांप्रशमं नयाशु उत्पातपाक
जनितांश्चमहोपसर्गान्॥ ३४॥प्रणतानांप्र
सीदत्वंदेवि विश्वार्तिहारिणि ॥त्रैलोक्यवा
सिनामीड्येलोकानांवरदाभव॥ ३५॥दे
व्युवाच॥ ३६ ॥वरदाहंसुरगणावरंयन्म

सा० नसेच्छथ ॥ तंवृणुध्वंप्रयच्छामिजगतामु अ० १
१२६ पकारकम् ॥ ३७॥ देवा ऊचुः ॥ ३८ ॥ स
र्वबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ॥
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम्
॥३९ ॥ देव्युवाच ॥४०॥ वैवस्वतेऽन्तरेप्रा
प्तेअष्टाविंशतिमेयुगे ॥ शुंभोनिशुम्भश्चैवा १२६
न्यावुत्पत्स्येतेमहासुरौ॥ ४१ ॥ नंदगोपगृ

हेजातायशोदागर्भसंभवा ॥ ततस्तौनाश
यिष्यामिविन्ध्याचलनिवासिनी ॥४२॥
पुनरप्यतिरौद्रेणरूपेणपृथिवीतले ॥ अव
तीर्यहनिष्यामि वैप्रचित्तांस्तु दानवान्
॥४३॥ भक्षयंत्याश्चतानुग्रान्वैप्रचित्तान्म
हासुरान् ॥ रक्तादन्ताभविष्यन्तिदाडिमी
कुसुमोपमाः ॥ ४४ ॥ ततोमांदेवताःस्वर्गे

स० मर्त्यलोकेचमानवाः ॥ स्तुवंतोव्याहरिष्यं अ० ११
१२७ तिसततंरक्तदंतिकाम् ॥ ४५ ॥ भूयश्चशत
वार्षिक्यामनावृष्ट्यामनंभासि ॥ मुनिभिः
संस्तुताभूमौसंभविष्याम्ययोनिजा ४६ ॥
ततः शतेननेत्राणांनिरीक्षिष्यामियन्मुनी
न् ॥ कीर्तयिष्यंतिमनुजाःशताक्षीमितिमां १२७
ततः॥४७॥ ततोऽहमखिलंलोकमात्मदेह

समुद्भवैः ॥ भरिष्यामिसुराः शाकरावृष्टः
प्राणधारकैः ॥ ४८ ॥ शाकंभरीतिविख्या
तितदाय्यास्याम्यहंभुवि ॥ तत्रैवचवधि
ष्यामिदुर्गमाख्यंमहासुरम् ॥ ४९ ॥ दुर्गा
देवीतिविख्यातंतन्मेनामभविष्यति ॥पुन
श्चाहंयदाभीमंरूपंकृत्वाहिमाचले॥५०॥
रक्षांसिभक्षयिष्यामिमुनीनां त्राणकारणा

त् ॥ तदामांमुनयः सर्वेस्तोष्यंत्यानम्रमूर्त
 यः ॥ ५१ ॥ भीमादेवीतिविख्यातं तन्मे ना
मभविष्यति ॥ यदाऽरुणाख्यस्त्रैलोक्ये म
हाबाधांकरिष्यति ॥ ५२ ॥ तदाहंभ्रामरंरू
पंकृत्वासंख्येयषट्पदम् ॥ त्रैलोक्यस्यहि
तार्थायवधिष्यामिमहासुरम् ॥ ५३ ॥ भ्रा
मरीतिचमांलोकास्तदास्तोष्यंतिसर्वतः ॥

इत्थंयदायदाबाधा दानवोत्था भविष्यति
॥ ५४ ॥ तदातदावतीर्याहंकरिष्याम्यरि
संक्षयम् ॥ ५५ ॥ इतिमार्कण्डेयपुराणे
सावर्णिकेमन्वंतरेदेवीमाहात्म्येनारायणी
स्तुतिर्नामएकादशोऽध्यायः ॥ ११ ॥उवा
च॥ ४॥ अर्ध ॥ १ ॥ श्लोक ॥ ५० ॥ एवं
॥ ५५ ॥ एवमादितः ॥ ६३० ॥ देव्युवा

स० २९ च ॥ १ ॥ एभिःस्तवैश्चमानित्यंस्तोष्य अ० १२
तेयःसमाहितः ॥ तस्याहंसकलांबाधांना
शयिष्याम्यसंशयम् ॥ २ ॥ मधुकैटभना
शंच महिषासुरघातनम् ॥ कीर्त्तयिष्यंतिये
तद्वद्वधंशुंभनिशुंभयोः ॥ ३ ॥ अष्टम्यांचच
तुर्दश्यांनवम्यांचैकचेतसः ॥ श्रोष्यंतिचैव १२९
येभक्त्याममामाहात्म्यमुत्तमं ॥ ४ ॥ नतेषां

दुष्कृतं किंचिद्दुष्कृतोत्थानचापदः ॥ भवि
ष्यति न दारिद्र्यं न चैवेष्टवियोजनम् ॥ ५ ॥
शत्रुतो न भयं तस्य दस्युतो वा न राजतः ॥
न शस्त्रानलतोयौघात्कदाचित्संभविष्यति
॥ ६ ॥ तस्मान्ममैतन्माहात्म्यं पठितव्यं स
माहितैः ॥ श्रोतव्यं च सदा भक्त्या परं स्व
स्त्ययनं महत् ॥ ७ ॥ उपसर्गानशेषांस्तु

स० महामारीसमुद्भवान् ॥ तथात्रिविधमुत्पा अ०१२
१३० तंमाहात्म्यंशमयेन्मम ॥ ८॥ यच्चैतत्पठ्य
तेसम्यङ्नित्यमायतनेमम ॥ सदानतद्वि
मोक्ष्यामिसान्निध्यंतत्रमेस्थितम् ॥ ९ ॥
बलिप्रदानेपूजायामग्निकार्येमहोत्सवे ॥ स
र्वंममैतच्चरितमुच्चार्यंश्राव्यमेवच ॥ १० ॥ १३०
जानताजानतावापि बलिपूजांतथाकृता

म् ॥ प्रतीक्षिष्याम्यहंप्रीत्यावह्निहोमंतथा
कृतम् ॥ ११ ॥ शरत्कालेमहापूजाक्रियतेया
चवार्षिकी ॥ तस्याममैतन्माहात्म्यंश्रुत्वा
भक्तिसमन्वितः ॥ १२ ॥ सर्वाबाधाविनि
र्मुक्तोधनधान्यसुतान्वितः ॥ मनुष्योमत्प्र
सादेन भविष्यतिनसंशयः ॥ १३ ॥ श्रुत्वाम
मैतन्माहात्म्यंतथाचोत्पत्तयःशुभाः ॥ परा

क्रमंचयुद्धेपुजायतेनिर्भयःपुमान् १४॥ रि
पवःसंक्षयंयांतिकल्याणंचोपपद्यते ॥ नंद
तेचकुलंपुंसांमाहात्म्यंममशृण्वतां॥ १५॥
शांतिकर्मणिसर्वत्र तथादुस्स्वप्नदर्शने ॥
ग्रहपीडासुचोग्रासु माहात्म्यंशृणुयान्मम
॥ १६॥उपसर्गाःशमंयांतिग्रहपीडाश्चदारु
णाः ॥दुःस्वप्नंचनृभिर्दृष्टंसुस्वप्नमुपजायते

॥१७॥ बालग्रहाभिभूतानांबालानां शां
तिकारकम् ॥ संघातभेदे च नृणां मैत्रीकर
णमुत्तमम्॥ १८॥दुर्वृत्तानामशेषाणांबल
हानिकरंपरम्॥ रक्षोभूतपिशाचानांपठना
देवनाशनम्॥ १९॥सर्वंममैतन्माहात्म्यंम
मसान्निध्यकारकम् ॥ पशुपुष्पार्घधूपैश्चगं
धदीपैस्तथोत्तमैः॥२०॥ विप्राणांभोजनै

होमैःप्रोक्षणीयैरहर्निशं॥ अन्यैश्चविविधै अ०१२
र्भोगैःप्रदानैर्वत्सरेणया॥२१॥ प्रीतिर्मेक्रि
यतेसास्मिन्सकृदुच्चारितेश्रुते॥श्रुतंहरतिपा
पानितथारोग्यंप्रयच्छति॥२२॥रक्षांकरो
तिभूतेभ्योजन्मनांकीर्तनंमम॥युद्धेषुचरि
तंयन्मेदुष्टदैत्यनिबर्हणं॥२३॥तस्मिन्श्रु १२२
तेवैरिकृतंभयंपुंसांनजायते॥ युष्माभिःस्तु

तयोयाश्चयाश्च ब्रह्मर्षिभिः कृताः २४॥ब्रह्म
णा चकृतास्तास्तुप्रयच्छंतिशुभामतिं॥ अ
रण्येप्रांतरेवापिदावाग्निपरिवारितः २५॥
दस्युभिर्वावृतःशून्येगृहीतोवापिशत्रुभिः॥
सिंहव्याघ्रानुयातोवावने वावनहस्तिभिः
॥२६॥ राज्ञाकुद्धेनचाज्ञप्तोवध्योबंधगतो
पिवा ॥आघूर्णितोवावातेनस्थितः पोतेम

हार्णवे ॥२७॥ पततसुचापिशस्त्रेषुसंग्रामेभृ
शदारुणे ॥सर्वाबाधासुघोरासुवेदनाभ्यर्दि
तोपिवा ॥ २८ ॥ स्मरन्ममैतच्चरितंनरोमु
च्येतसङ्कटात् ॥ ममप्रभावात्सिंहाद्यादस्य
वोवैरिणस्तथा ॥ २९ ॥ दूरादेवपलायंते
स्मरतश्चरितं मम ॥ ३० ॥ ऋषिरुवाच
॥ ३१ ॥ इत्युक्त्वासाभगवतीचंडिकाचं

डविक्रमा ॥ ३२ ॥ पश्यतामेवदेवानांत
त्रैवांतरधीयत ॥ तेऽपिदेवानिरातंकाःस्वा
धिकारान्यथापुरा ॥ ३३ ॥ यज्ञभागभुजः
सर्वेचक्रुर्विनिहतारयः॥ दैत्याश्चदेव्यानिह
तेशुंभेदेवरिपौयुधि ॥ ३४ ॥ जगद्विध्वंसके
तस्मिन्महोग्रेऽतुलविक्रमे॥ निशुंभेचमहा
वीर्येशेषाःपातालमाययुः॥ ३५॥एवंभगव

तीदेवीसानित्यापिपुनःपुनः ॥ संभूयकुरुते
भूपजगतःपरिपालनं ॥ ३६ ॥ तयैतन्मोह्य
तेविश्वंसैवविश्वंप्रसूयते ॥सायाचिताचवि
ज्ञानंतुष्टाऋद्धिंप्रयच्छति ॥ ३७ ॥ व्याप्तं
तयैतत्सकलंब्रह्माण्डंमनुजेश्वर ॥ महाका
ल्यामहाकालेमहामारीस्वरूपया ॥ ३८ ॥ १३२
सैवकालेमहामारी सैवसृष्टिर्भवत्यजा ॥

स्थितिंकरोतिभूतानां सैवकालेसनातनी
॥३९॥ भवकालेनृणांसैवलक्ष्मीर्वृद्धिप्रदा
गृहे॥ सैवाभावे तथालक्ष्मीर्विनाशायोप
जायते॥ ४० ॥ स्तुतासंपूजितापुष्पैर्धूपगं
धादिभिस्तथा॥ ददातिवित्तंपुत्रांश्चमतिंध
र्मेगतिंशुभाम् ॥ ४१ ॥ इतिमार्कण्डेय
पुराणेसावर्णिकेमन्वंतरे देवीमाहात्म्येम

४० गवतीवाक्यंनामद्वादशोऽध्यायः ॥ १२ ॥ अ०१३
१३५ उवाच ॥ २ ॥ अर्थ ॥ २ ॥ श्लोक ॥ ३७ ॥
एवं ॥ ४१ ॥ एवमादितः ॥ ६७१ ॥
ऋषिरुवाच ॥ १ ॥ एतत्तेकथितंभूपदे
वीमाहात्म्यमुत्तमम् ॥ एवंप्रभावासादेवीय
येदंधार्यतेजगत् ॥ २ ॥ विद्यातथैवक्रियते १३८
भगवद्विष्णुमायया ॥ तयात्वमेषवैश्यश्चत

थैवान्येविवेकिनः॥३॥ मोह्यंतेमोहिताश्चै
वमोहमेष्यंतिचापरे॥ तामुपैहिमहाराजश
रणंपरमेश्वरीम् ॥४॥ आराधितासैवनृणां
भोगस्वर्गापवर्गदा ॥५॥ मार्कण्डेयउवाच
॥ ६ ॥ इतितस्यवचः श्रुत्वा सुरथःसन
राधिपः॥७॥ प्रणिपत्यमहाभागं तमृषिं
शंसितव्रतं॥ निर्विण्णोऽतिममत्वेनराज्या

प्रहरणेनच ॥८॥ जगामसद्यस्तपसेसचवै
श्योमहामुने ॥ संदर्शनार्थमंबायानदीपुलि
नसंस्थितः ॥९॥ सचवैश्यस्तपस्तेपेदेवीसू
क्तंपरंजपन्॥तौतस्मिन्पुलिनेदेव्याःकृत्वा
मूर्तिंमहीमयीम् ॥ १०॥ अर्हणांचक्रतुस्त
स्याः पुष्पधूपाग्नितर्पणैः ॥ निराहारौयता
हारौतन्मनस्कौसमाहितौ ॥ ११ ॥ ददतु

स्तौबलिंचैवनिजगात्रासृगुक्षितम् ॥एवंस
माराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ॥ १२ ॥
परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चंडिका
॥ १३ ॥ देव्युवाच ॥ १४ ॥ यत्प्रा
र्थ्यते त्वयाभूपत्वयाचकुलनंदन ॥ १५ ॥
मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि तत्
॥ १६ ॥ मार्कण्डेय उवाच ॥ १७ ॥

४० ततो वव्रेनृपो राज्यमविभ्रंश्यन्यजन्मनि ३०१
१३७ ॥ १८ ॥ अत्रैवचनिजंराज्यंहतशत्रुबलंब
लात् ॥सोऽपिवैश्यस्ततोज्ञानंवव्रेनिर्विण्ण
मानसः ॥ १९ ॥ ममेत्यहमितिप्राज्ञसंग
विच्युतिकारकम् ॥२०॥देव्युवाच॥२१॥
स्वल्पैरहोभिर्नृपतेस्वंराज्यंप्राप्स्यते भवा १३७
न् ॥२२॥ हत्वारिपूनस्खलितंतवतत्रभावि

ष्यति ॥ मृतश्चभूयःसंप्राप्य जन्मदेवाद्विव
स्वतः ॥२३॥ सावर्णिकोनाममनुर्भवान्भु
विभविष्यति॥वैश्यवर्यत्वयायश्चवरोऽस्म
त्तोऽभिवाञ्छितः ॥२४॥ तंप्रयच्छामिसं
सिद्ध्यैतवज्ञानंभविष्यति ॥ २५ ॥ मार्कं
डेयउवाच॥२६॥ इतिदत्त्वातयोर्देवीयथा
भिलषितंवरम् ॥२७॥ बभूवांतर्हितासद्यो

म० भक्त्यातास्याभःसंस्तुता ॥ एवंदेव्यावरं ल
१३८ ब्ध्वासुरथःक्षत्रियर्षभः ॥२८॥ सूर्याज्जन्म
समासाद्यसावर्णिर्भवितामनुः ॥ २९ ॥
इतिमार्कंडेयपुराणेसावर्णिके मन्वंतरे दे
वीमाहात्म्येसुरथवैश्ययोर्वरप्रदानं नामत्र
योदशोऽध्यायः ॥ १३ ॥ उवाच ॥ ६ ॥ अ
र्ध ॥ ११ ॥ श्लोक ॥ १२ एवं ॥ ३० ॥

एवमादितः ॥ ७०० ॥ ॥
॥ अथोत्तरन्यासाः ॥ खड्गिनीशूलिनी
घोरा० हृदयायनमः ॥ शूलेनपाहिनोदे
वि० शिरसेस्वाहा ॥ प्राच्यांरक्षप्रतीच्यां
च० शिखायैवषट् ॥ सौम्यानियानिरूपा
णि० कवचायहुं ॥ खड्गशूलगदादीनि०
नेत्रत्रयायवौषट् ॥ सर्वस्वरूपेसर्वेशे० अ

स्यात्फट् ॥ अथ ध्यानम् ॥ विद्युद्दामसमप्र
१३० भां मृगपतिस्कंधस्थितां भीषणांकन्या
भिः करवालखेटविलसद्धस्ताभिरासेवि
ताम् ॥ हस्तैश्चक्रवरासिखेटविशिखांश्चाप
गुणंतर्जनीं बिभ्राणामनलात्मिकांशशिध
रांदुर्गांत्रिनेत्रांभजे ॥ १ ॥ अथदेवीसूक्तं ॥ १२९
नमोदेव्यैमहादेव्यैशिवायैसततंनमः ॥ न

मःप्रकृत्यैभद्रायैनियताः प्रणतास्स्म ताम्
॥ १ ॥ रौद्रायैनमोनित्यायैगौर्य्यैधात्र्यैन
मोनमः ॥ ज्योत्स्नायैचेंदुरूपिण्यैसुखायै
सततंनमः ॥ २ ॥ कल्याण्यैप्रणतांवृद्ध्यै
सिद्ध्यैकुर्म्मोनमोनमः॥ नैर्ऋत्यैभूभृतां ल
क्ष्म्यैशर्वाण्यैतेनमोनमः ॥ ३ ॥ दुर्गायैदुर्ग
पारायैसारायैसर्वकारिण्यै॥ ख्यात्यैतथैव

कृष्णायैधूम्रायैसततंनमः ॥ ४ ॥ अतिसौ
१२० म्यातिरौद्रायैनतास्तस्यैनमोनमः ॥ नमो
जगत्प्रतिष्ठायैदेव्यैकृत्यैनमोनमः ॥५॥ या
देवीसर्वभूतेषुविष्णुमायेतिशब्दिता ॥ नम
स्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः॥६॥
यादेवीसर्वभूतेषुचेतनेत्यभिधीयते ॥ नम १२०
स्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः॥७॥

यादेवीसर्वभूतेषुबुद्धिरूपेणसंस्थिता॥नम
स्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः ८॥
यादेवीसर्वभूतेषुनिद्रारूपेणसंस्थिता॥नम
स्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः।९॥
यादेवीसर्वभूतेषुक्षुधारूपेणसंस्थिता।नम
स्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः १०
यादेवीसर्वभूतेषुछायारूपेणसंस्थिता ॥

नमस्तस्यैनमस्तस्यैनमस्तस्यैनमो नमः

१२१ ॥ ११ ॥ यादेवीसर्वभूतेपुशक्तिरूपेणासं

स्थिता ॥ नमस्तस्यैनमस्तस्यैनमस्तस्यै

नमोनमः ॥ १२ ॥ यादेवीसर्वभूतेपुतृष्णा

रूपेणसंस्थिता ॥ नमस्तस्यैनमस्तस्यैन

मस्तस्यैनमोनमः ॥ १३ ॥ यादेवीसर्वभूते १३

पुक्षांतिरूपेणसंस्थिता ॥ नमस्तस्यैनम

स्तस्यैनमस्तस्यैनमोनमः ॥१४॥ यादेवी सर्वभूतेषुजातिरूपेणसंस्थिता ॥ नमस्त स्यैनमस्तस्यैनमस्तस्यैनमोनमः ॥१५॥ यादेवीसर्वभूतेषुलज्जारूपेणसंस्थिता॥ न मस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १६ यादेवीसर्वभूतेषुशांतिरूपेणसंस्थि ता॥नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोन

सः ॥१७॥ यादेवीसर्वभूतेषुश्रद्धारूपेणसं
स्थिता ॥ नमस्तस्यैनमस्तस्यैनमस्तस्यै
नमोनमः ॥१८॥यादेवीसर्वभूतेषुकांतिरू
पेणसंस्थिता॥नमस्तस्यैनमस्तस्यैनमस्त
स्यैनमोनमः ॥ १९ ॥ यादेवीसर्वभूतेषुल
क्ष्मीरूपेणसंस्थिता ॥ नमस्तस्यैनमस्त १२२
स्यैनमस्तस्यैनमोनमः ॥२०॥ यादेवीस

र्वभूतेषुवृत्तिरूपेणसंस्थिता ॥ नमस्तस्यै
नमस्तस्यैनमस्तस्यैनमोनमः ॥ २१ ॥
यादेवीसर्वभूतेषुस्मृतिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः
॥२२॥ यादेवीसर्वभूतेषुदयारूपेणसंस्थि
ता ॥ नमस्तस्यैनमस्तस्यैनमस्तस्यैनमो
नमः ॥ २३ ॥ यादेवीसर्वभूतेषुतुष्टिरूपेण

४० संस्थिता ॥ नमस्तस्यैनमस्तस्यैनमस्त
१३२ स्यैनमोनमः ॥ २४ ॥ यादेवीसर्वभूतेषुमा
तृरूपेणसंस्थिता ॥ नमस्तस्यैनमस्तस्यै
नमस्तस्यैनमोनमः ॥ २५ ॥ यादेवीसर्वभू
तेषुभ्रांतिरूपेणसंस्थिता॥ नमस्तस्यैनम
स्तस्यैनमस्तस्यैनमोनमः ॥२६॥ इंद्रिया १३२
णामधिष्ठात्रीभूतानांचाखिलेषुया ॥ भूते

षुसततं तस्यै व्याप्त्यैदेव्यैनमोनमः॥२७॥
चितिरूपेणया कृत्स्नमेतद्व्याप्य स्थिता
जगत् ॥नमस्तस्यैनमस्तस्यै नमस्तस्यैन
मोनमः ॥ २८॥ स्तुतासुरैः पूर्वमभीष्टसंश्र
यात्तथासुरेंद्रेणादिनेषुसेविता॥करोतुसानः
शुभहेतुरीश्वरी शुभानि भद्राण्यभिहंतुचा
पदः ॥ २९ ॥ यासांप्रतंचोद्धतदैत्यतापितै

रस्माभिरीशाच सुरैर्नमस्यते॥ याच स्मृता
तत्क्षणमेवहंतिनः सर्वापदोभक्तिविनम्रमू
र्तिभिः॥३०॥इतिदेवीसूक्तंपठित्वाष्टोत्तर
शतं नवार्णजपंकृत्वातदुत्तरन्यासान्विधा
य॥ गुह्यातिगुह्यगोप्त्रीत्वंगृहाणास्मत्कृतं
जपं॥ सिद्धिर्भवतुमेदेवित्वत्प्रसादान्महेश्व १४४
रि॥३१॥इतिदेव्यावामहस्तेजपंनिवेदयेत्

॥ श्रीगणपतिर्जयति ॥ अस्यश्रीसप्त
शतीरहस्यत्रयस्य ॥ नारायणऋषिः ॥ अ
नुष्टुप्छन्दः ॥ महाकालीमहालक्ष्मीमहा
सरस्वत्योदेवताः ॥ यथोक्तफलावाप्त्य
र्थंजपेविनियोगः ॥ राजोवाच ॥ भगव
न्नवतारामेचंडिकायास्त्वयोदिताः ॥ एते
षांप्रकृतिंब्रह्मन्प्रधानंवक्तुमर्हसि ॥ १ ॥

आराध्यंयन्मयादेव्याःस्वरूपंयेनतद्द्विज॥
१२८ विधिनाब्रूहि सकलं यथावत्प्रणतस्य मे
॥ २ ॥ ऋषिरुवाच ॥ इदंरहस्यंपरमम
नाख्येयंप्रचक्षते॥भक्तोसीतिनमेकिंचित्त
वावाच्यंनराधिप॥३॥सर्वस्याद्यामहाल
क्ष्मीस्त्रिगुणापरमेश्वरी ॥ लक्ष्यालक्ष्यस्व १२९
रूपासाव्याप्यकृत्स्नं व्यवस्थिता ॥ ४ ॥

मातुलिंगंगदांखेटंपानपात्रंचबिभ्रती ॥ ना
गंलिंगंचयोनिंचबिभ्रतीनृपमूर्धनि ॥ ५ ॥
तप्तकांचनवर्णाभातप्तकांचनभूषणा ॥ शू
न्यंतदखिलंस्वेनपूरयामासतेजसा ॥ ६ ॥
शून्यंतदखिलंलोकंविलोक्यपरमेश्वरी ॥
बभाररूपमपरंतमसाकेवलेनहि ॥ ७ ॥ सा
भिन्नांजनसङ्काशादंष्ट्रांचितवरानना ॥ वि

१० शाललोचनानारीत्वभूवतनुमध्यमा ॥८॥ १०
१२५ खड्गपाशशिरःखेटैरलंकृतचतुर्भुजा ॥ कवं
धहारंशिरसाबिभ्राणाहिशिरःस्रजं॥९॥सा
प्रोवाचमहालक्ष्मींतामसीप्रमदोत्तमा॥ना
मकर्मचमेमातर्देहितुभ्यंनमोनमः ॥१०॥
तांप्रोवाचमहालक्ष्मीस्तामसींप्रमदोत्तमां १२६
॥ ददामितवनामानियानिकर्माणितानिच

॥ ११ ॥ महामाया महाकाली महामारी
क्षुधातृषा ॥ निद्रातृष्णा चैकवीराकालरा
त्रिर्दुरत्यया ॥ १२ ॥ इमानितवनामानिप्र
तिपाद्यानिकर्मभिः ॥ एभिःकर्माणितेज्ञा
त्वायोऽधीते सोऽश्नुते सुखम् ॥ १३ ॥
तामित्युक्त्वामहालक्ष्मीः स्वरूपमपरंनृ
प ॥ सत्वाख्येनातिशुद्धेन गुणेनेंदुप्रभंदधौ

मा० ॥ १४ ॥ अक्षमालांकुशधरावीणापुस्तक १०
१४७ धारिणी॥सावभूववरानारीनामान्यस्यैच
सादद्दौ॥१५॥महाविद्यामहावाणीभारती
वाक्सरस्वती॥आर्याब्राह्मीकामधेनुर्वेदग
भाचधीश्वरी॥१६॥अथोवाचमहालक्ष्मी
र्महाकालींसरस्वतीं ॥ युवांजनयतांदेव्यौ १४७
मिथुनेस्वानुरूपतः॥१७॥इत्युक्त्वातेमहा

लक्ष्मीः ससर्जमिथुनंस्वयं॥ हिरण्यगर्भौरु
चिरौस्त्रीपुंसौकमलासनौ॥ १८ ॥ब्रह्मन्वि
धेविरिंचेतिधातारित्याहतंनरं ॥ श्रीःपद्मेक
मलेलक्ष्मीत्याहमातास्त्रियंचताम्॥ १९ ॥
महाकालीभारतीचामिथुनेसृजतःसह॥एत
योरपिरूपाणिनामानिचवदामिते॥ २० ॥
नीलकंठंरक्तबाहुंश्वेतांगंचंद्रशेखरं ॥ जन

यामासपुरुषंमहाकालीस्तितांस्त्रियं॥ २१॥
रुद्रःशंकरःस्थाणुःकपर्दीचत्रिलोचनः ॥
त्रयीविद्याकामधेनुः सास्त्रीभाषाक्षराक्षरा
॥२२॥ सरस्वतींस्त्रियंगौरींकृष्णंचपुरुषंनृ
प ॥ जनयामासनामानितयोरपिवदाम्यते
॥ २३ ॥ विष्णुःकृष्णोहृषीकेशोवासुदेवो
जनार्दनः ॥ उमागौरीसतीचंडीसुंदरीसभ

गाशुभा ॥ २४ ॥ एवंयुवतयःसद्यःपुरुषत्वं
प्रपेदिरे ॥ चक्षुष्मंतोनुपश्यंतिनेतरेतद्विदोज
नाः ॥ २५ ॥ ब्रह्मणेप्रददौपत्नींमहालक्ष्मी
र्नृपत्रयीम्॥ रुद्रायगौरींवरदांवासुदेवायच
श्रियम् ॥ २६॥ स्वरयासहसंभूयविरंचोंड
मजीजनत् ॥ बिभेदभगवान्रुद्रस्तच्छ्रैयासि
हवीर्यवान्॥२७॥अंडमध्येप्रधानादिकार्य

श्री० जातमभून्नृप ॥ महाभूतात्मकंसर्वंजगत्स्था १०
१४९ वरजंगमम् ॥२८॥पुपोषपालयामासतल्ल
क्ष्म्यासहकेशवः॥संजहारजगत्सर्वंसहगौ
र्यामहेश्वरः ॥ २९ ॥ महालक्ष्मीर्महा
राजसर्वसत्त्वमयीश्वरी ॥ निराकाराच
साकारासैव नानाभिधानभृत् ॥ ३० ॥ १४०
नामांतरैर्निरूप्यैषा नाम्ना नान्येनकेन

च्चित् ॥ इतिप्राधानिकं रहस्यंसमाप्तम् ॥
ऋषिरुवाच ॥ त्रिगुणा तामसी देवी सा
त्त्विकीयात्वयोदिता ॥ साशर्वाचंडिकादु
र्गाभद्राभगवतीर्यते ॥ १ ॥ योगनिद्राहरे
रुक्तामहाकालीतमोगुणा ॥ मधुकैटभना
शार्थंयांतुष्टावांबुजासनः ॥ २ ॥ दशवक्त्रा
दशभुजादशपादांजनप्रभा ॥ विशालयारा

१० जमानांत्रिंशल्लोचनमालया ॥ ३ ॥ स्फुरद्द १०
१८० शनदंष्ट्रासाभीमरूपापि भूमिप ॥ रूपसौभा
ग्यकांतीनांसाप्रतिष्ठा महाश्रियाम् ॥ ४ ॥
खड्गवाणगदाशूलशंखचक्रभुशुंडिभृत् ॥ प
रिघंकार्मुकंशीर्षंनिश्चोतद्रुधिरंदधौ ॥ ५ ॥
एषासावैष्णवीमायामहाकालीदुरत्यया ॥ १८०
आराधिता वशीकुर्यात्पूजाकर्तुश्चराचरम्

॥ ६ ॥ सर्वदेवशरीरेभ्योयाविर्भूतामितप्र
भा ॥ त्रिगुणासामहालक्ष्मीःसाक्षान्महिष
मर्दिनी ॥ ७ ॥ श्वेताननानीलभुजासुश्वेत
स्तनमंडला ॥ रक्तमध्यारक्तपादानीलजं
घोरुरुन्मदा ॥ ८ ॥ सुचित्रजघनाचित्रमा
ल्यांबराविभूषणा॥ चित्रानुलेपनाकांतिरू
पसौभाग्यशालिनी ॥ ९ ॥ अष्टादशभुजापू

१० ज्यासासहस्रभुजासती ॥ आयुधान्यत्रव १०
१५१ क्ष्यंतेदक्षिणाधःकरक्रमात् ॥ १०॥ अक्षमा
लाचक्रमलंबाणोऽसिःकुलिशंगदा ॥ चक्रं
त्रिशूलंपरशुः शंखोघंटाचपाशकः ॥ ११॥
शक्तिर्दंडश्चर्मचापंपानपात्रंकमंडलुः॥अलं
कृतभुजामेभिरायुधैःकमलासनाम्॥१२॥ १५३
सर्वदेवमयीमीशांमहालक्ष्मीमिमांनृप ॥

पूजयेत्सर्वलोकानां सदेवानां प्रभुर्भवेत्
॥ १३ ॥ गौरीदेहात्समुद्भूतायासत्त्वैकगुणा
श्रया ॥ साक्षात्सरस्वतीप्रोक्ताशुंभासुरनि
बर्हिणी ॥ १४ ॥ दधौचाष्टभुजाबाणान्मुस
लंशूलचक्रभृत् ॥ शंखंघंटांलांगलंचकार्मु
कंवसुधाधिप ॥ १५ ॥ एषासंपूजिताभक्त्या
सर्वज्ञत्वंप्रयच्छति ॥ निशुंभमाथिनीदेवीशुं

भास्वरानिबर्हिणी ॥ १६ ॥ इत्युक्तानिस्वरू
१५२ पाणिमूर्तीनांतवपार्थिव॥उपासनंजगन्मा
तुःपृथगासांनिशामय ॥ १७ ॥ महालक्ष्मी
र्यदापूज्यामहाकालीसरस्वती ॥ दक्षिणो
त्तरयोःपूज्येपृष्ठतोमिथुनत्रयं ॥ १८॥ विरं
चिःस्वरयामध्येरुद्रोगौर्याचदक्षिणे॥वामे १८२
लक्ष्म्याहृषीकेशःपुरतोदेवतात्रयं ॥ १९ ॥

अष्टादशभुजामध्येवामेचास्यादशानना॥
दक्षिणेऽष्टभुजालक्ष्मीर्महतीति समर्चयेत्
॥२०॥पूर्वादिदलतःपूज्याअसितांगादिभै
रवाः ॥ अष्टादशभुजाचैषायदापूज्यानरा
धिप ॥२१॥दशाननाचाष्टभुजादक्षिणोत्त
रयोस्तदा॥दशाननायदापूज्यादक्षिणोत्तर
योस्तदा॥२२॥कालमृत्यूचसंपूज्यौसर्वा

पे॰ रिष्टप्रशांतये॥यद्वाचाष्टभुजापूज्याशुंभासु
१५२ रनिबर्हिणी॥२३॥नवास्याःशक्तयःपूज्या
स्तदारुद्रविनायकौ॥ नमोदेव्याइतिस्तोत्रै
र्महालक्ष्मींसमर्चयेत्॥२४॥अवतारत्रया
र्चायांस्तोत्रमंत्रास्तदाश्रयाः॥ अष्टादशभु
जाचैषापूज्यामहिषमर्दिनी॥२५॥महा
लक्ष्मीर्महाकालीसैवप्रोक्तासरस्वती॥ ई

श्वरीपुण्यपापानांसर्वलोकमहेश्वरी॥२६॥
महिषांतकरीयेनपूजितासजगत्प्रभुः ॥ पू
जयेज्जगतांधात्रीं चण्डिकांभक्तवत्सलाम्
॥ २७ ॥ अर्घ्यादिभिरलंकारैर्गंधपुष्पैस्त
थोत्तमैः॥ धूपैर्दीपैश्चनैवेद्यैर्नानाभक्ष्यसम
न्वितैः॥२८॥ रुधिराक्तेनबलिनामांसेन
सुरयानृप॥ बलिमांसादिपूजेयंविप्रवर्ज्या

मयेरिता ॥ २९ ॥ तेषांकिलसुरामांसैर्नो
क्तापूजानृपक्वचित् ॥ प्रणामाचमनीयैश्च
चंदनेनसुगंधिना ॥ ३० ॥ सकर्पूरैश्चतांबू
लैर्भक्तिभावसमन्वितैः ॥ वामभागेऽग्रतोदे
व्याश्छिन्नशीर्षंमहासुरम् ॥ ३१ ॥ पूजये
न्महिषंयेनप्राप्तंसायुज्यमीशया ॥ दक्षिणे
पुरतःसिंहंसमग्रंधर्ममीश्वरम् ॥ ३२ ॥ वाह

नंपूजयेद्देव्याधृतंयेनचराचरम् ॥ ततः
कृतांजलिर्भूत्वास्तुवीतचरितैरिमैः॥ ३३॥
एकेनवामध्यमेननैकेनेतरयोरिह॥ चरितां
र्धंतु न जपेज्जपाञ्छिद्रमवाप्नुयात्॥ ३४ ॥
स्तोत्रमंत्रैः स्तुवीतेमांयदिवाजगदंबिका
म् ॥ प्रदक्षिणानमस्कारान्कृत्वामूर्ध्निकृतां
जलिः ॥ ३५ ॥ क्षमापयेज्जगद्धात्रीं

मुहुर्मुहुरतंद्रितः ॥ प्रतिश्लोकंचजुहुया
त्पायसंतिलसर्पिषा ॥ ३६ ॥ जुहुयात्स्तो
त्रमंत्रैर्वाचंडिकायैशुभंहविः ॥ भूयोनाम
पदैर्देवींपूजयेत्सुसमाहितः ॥ ३७ ॥ प्रयतः
प्रांजलिः प्रह्वः प्राणानारोप्य चात्मनि ॥
सुचिरं भावयेद्देवीं चंडिकां तन्मयो भवेत्
॥ ३८ ॥ एवंयः पूजयेद्भक्त्याप्रत्यहंपरमे

श्वरीम् ॥ भुक्त्वाभोगान्यथाकामंदेवीसा
युज्यमाप्नुयात् ॥ ३९ ॥ योनपूजयतेनित्यं
चंडिकांभक्तवत्सलाम् ॥ भस्मीकृत्यास्य
पुण्यानिनिर्दहेत्परमेश्वरी ॥ ४० ॥ तस्मात्पू
जयभूपालसर्वलोकमहेश्वरीम् ॥ यथोक्ते
नाविधानेनचंडिकांसुखमाप्स्यसि ॥ ४१ ॥
इतिवैकृतिकंरहस्यंसमाप्तम् ॥ ॥ ऋषिरु

५० वाच ॥ नंदाभगवतीनामयाभविष्यतिनंद
१५६ जा ॥ स्तुतासंपूजिताभक्त्यावशीकुर्याज्ज
गत्त्रयम् ॥ १ ॥ कनकोत्तमकांतिः सासु
कांतिकनकांबरा ॥ देवीकनकवर्णाभाकन
कोत्तमभूषणा ॥ २ ॥ कमलांकुशपाशा
ब्जैरलंकृतचतुर्भुजा ॥ इंदिराकमलाल
क्ष्मीः साश्रीरुक्मांबुजासना ॥ ३ ॥ यार

क्तदंतिकानामदेवीप्रोक्तामयानघ ॥ त
स्याःस्वरूपंवक्ष्यामिशृणु सर्वभयापहम्
॥ ४ ॥ यच्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्र
संशयः ॥ रक्तांबरारक्तवर्णारक्तसर्वांगभूष
णा॥ ५ ॥रक्तायुधारक्तनेत्रारक्तकेशातिभी
षणा ॥ रक्ततीक्ष्णनखारक्तरसनारक्तदंति
का ॥ ६ ॥ पतिंनारीवानुरक्तादेवीभक्तंभजे

ञ्जनम् ॥ वसुधेवविशालासासुमेरुयुगल
स्तनी ॥ ७ ॥ दीर्घौलंबावतिस्थूलौतावतीव
मनोहरौ ॥ कर्कशावतिकांतौतौसर्वानंद
पयोनिधी ॥ ८ ॥ भक्तान्संपाययेद्देवीसर्व
कामदुघौस्तनौ ॥ खड्गपात्रशिरःखेटैरलंकृ
तचतुर्भुजा ॥ ९ ॥ आख्यातारक्तचामुंडादे
वीयोगेश्वरीतिच ॥ अनया व्याप्तमखिलं

जगत्स्थावरजंगमम् ॥ १० ॥ इमां यः पूजये
द्भक्त्या सव्याप्नोति चराचरम् ॥ भुक्त्वा
भोगान्यथाकामं देवीसायुज्यमाप्नुयात्
॥ ११ ॥ अधीते य इमं नित्यं रक्तदंत्या वपु:
स्तवम् ॥ तं सा परिचरेद्देवी पतिं प्रियमिवांग
ना ॥ १२ ॥ शाकंभरी नीलवर्णा नीलोत्पल
विलोचना ॥ गंभीरनाभिस्त्रिवलीविभूषित

मू० तनूदरी ॥ १३ ॥ सुकर्कशसमोत्तुंगवृत्तपी
१५८ नघनस्तनी ॥ मुष्टौशिलीमुखापूर्णंकमलं
कमलालया ॥ १४ ॥ पुष्पपल्लवमूलादिफ
लाढ्यंशाकसंचयम् ॥ काम्यानंतरसैर्यु
क्तंक्षुत्तृण्मृत्युजरापहम् ॥ १५ ॥ कार्मुकंच
स्फुरत्कांतिबिभार्तिपरमेश्वरी ॥ शाकंभरी
शताक्षीसासैवदुर्गाप्रकीर्तिता ॥ १६ ॥ उमा

गौरीसती चंडी कालिका साचपार्वती ॥
शाकंभरींस्तुवन्ध्यायन् जपन्संपूजयन्नम
न् ॥१७॥ अक्षय्यमश्नुतेशीघ्रमन्नपानामृ
तंजलं ॥ भीमाऽपिनीलवर्णासादंष्ट्रादशन
भासुरा॥१८॥विशाललोचनानारीवृत्तपी
नपयोधरा॥चंद्रहासंचडमरुंशिरः पात्रंच
बिभ्रती॥ १९ ॥ एकवीराकालरात्रिःसैवो

क्तकामदास्तुला ॥ तेजोमंडलदुर्धर्षास्त्राम

रीचित्रकांतिभृत् ॥ २० ॥ छिन्नभ्रमरसंज्ञा

शामहामारीतिगीयते ॥ इत्येतामूर्तयोदि

व्या व्याख्याता वसुधाधिप ॥ २१ ॥ जग

न्मातुश्चंडिकायाः कीर्तिताः कामधेनवः ॥

इदं रहस्यं परमं न वाच्यं कस्यचित्त्वया

॥ २२ ॥ व्याख्यानंदिव्यमूर्तीनामधीष्वा

वाहितःस्वयम् ॥ एतस्यास्त्वंप्रसादेनसर्व
मान्योभविष्यसि ॥ २३ ॥ सर्वरूपमयीदे
वीसर्वंदेवीमयंजगत् ॥ अतोऽहंविश्वरूपा
त्वांनमामिपरमेश्वरीम् ॥ २४ ॥ इतिमूर्ति
रहस्यं समाप्तम् ॥ ॥ ॥

स० श्रीगणेशाय नमः ॥ अथ सरस्वतीकवचस्तोत्रारंभः ॥ ब्रह्मोवाच ॥
शृणु वत्स प्रवक्ष्यामि कवचं सर्वकामदम् ॥ श्रुतिसारं श्रुतिसुखं
१६० श्रुत्युक्तं श्रुतिपूजितम् ॥ १ ॥ उक्तं कृष्णेन गोलोके मह्यं वृन्दा-
वने वने ॥ रासेश्वरेण विभुना रासेन रासमण्डले ॥ २ ॥ अतीव
गोपनीयं च कल्पवृक्षसमं परम् ॥ अश्रुताद्भुतमंत्राणां समूहैश्च
समन्वितम् ॥ ३ ॥ यद्धृत्वा पठनाद्ब्रह्मन् बुद्धिमांश्च बृहस्पतिः ॥
यद्धृत्वा भगवान् शुक्रः सर्वदैत्येषु पूजितः ॥ ४ ॥ पठनाद्धार-
णाद्वाग्मी कवीन्द्रो वाल्मिको मुनिः ॥ ५ ॥ स्वायंभुवो मनुश्चैव
यद्धृत्वा सर्वपूजितः ॥ कणादो गौतमः कण्वः पाणिनिः शाक-
टायनः ॥ ६ ॥ ग्रंथं चकार यद्धृत्वा दक्षः कात्यायनः स्वयम् ॥ ७ ॥
धृत्वा वेदविभागं च पुराणान्यखिलानि च ॥ चकार लीला-
मात्रेण **कृष्णद्वैपायनः स्वयम्** ॥ ८ ॥ **शातातपश्च संवर्तो** वसि-

म्बिकायै स्वाहा वायव्यां मां सदावतु ॥ ॐ गद्यपद्यवासिन्यै स्वाहा मामुत्तरेऽवतु ॥ २३ ॥ ॐ सर्वशास्त्रवासिन्यै स्वाहैशान्यां सदावतु ॥ ॐ ह्रीं सर्वपूजितायै स्वाहा चोर्ध्वे सदावतु ॥ २४ ॥ ऐं ह्रीं पुस्तकवासिन्यै स्वाहाधो मां सदावतु ॥ ॐ ग्रंथबीजरूपायै स्वाहा मां सर्वतोऽवतु ॥ २५ ॥ इति ते कथितं विप्र सर्वमंत्रौघविग्रहम् ॥ इदं विश्वजयं नाम कवचं ब्रह्मरूपिणम् ॥ २६ ॥ पुरा श्रुतं धर्मवक्त्रात् पर्वते गंधमादने ॥ तव स्नेहान्मयाऽऽख्यातं प्रवक्तव्यं न कस्यचित् ॥ २७ ॥ गुरुमभ्यर्च्य विधिवद्वस्त्रालंकारचंदनैः ॥ प्रणम्य दंडवद्भूमौ कवचं धारयेत् सुधीः ॥ २८ ॥ पंचलक्षजपेनैव सिद्धं तु कवचं भवेत् ॥ यदि स्यात् सिद्धकवचो बृहस्पतिसमो भवेत् ॥ २९ ॥ महावाग्मी कवींद्रश्च त्रैलोक्यवि-

ब्र० १६२

ग्मी भवेत् ॥ शक्नोति सर्वं गेतुं स कवचस्य प्रसादतः ॥ ३० ॥
इति ते काण्वशाखोक्तं कथितं कवचं मुने ॥ स्तोत्रं पूजावि-
धानं च ध्यानं च वंदनं तथा ॥ ३१ ॥ इति श्रीब्रह्मवैवर्ते महा-
पुराणे प्रकृतिखंडे नारायणनारदसंवादे सरस्वतीकवचं नाम
चतुर्थोऽध्यायः ॥ ४ ॥

इदं पुस्तकं कल्याणनगर्यां श्रीकृष्णदासात्मज-गङ्गाविष्णोः स्वकीये
" लक्ष्मीवेङ्कटेश्वर " नामकमुद्रणागारे यन्त्रसौ
रामचंद्रराघो इत्यनेन स्वाम्यर्थमङ्कितम्, संवत १९६१. शके १८२६.

पुस्तक मिलनेका ठिकाना—गंगाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेंकटेश्वर" छापाखाना, कल्याण—मुंबई.

कृ० १

स्वाहेति दन्तपंक्तीः सदावतु ॥ ऐमित्येकाक्षरो मन्त्रो मम कंठं सदावतु ॥ १६ ॥ ॐ श्रीं ह्रीं पातु मे ग्रीवां स्कंधं मे श्रीः सदावतु ॥ श्रीं विद्याधिष्टातृदेव्यै स्वाहा वक्षः सदावतु ॥ १७ ॥ ॐ ह्रीं विद्यास्वरूपायै स्वाहा मे पातु नासिकाम् ॥ ॐ ह्रीं ह्रीं वाण्यै स्वाहेति मम पृष्ठं सदावतु ॥ १८ ॥ ॐ सर्ववर्णात्मिकायै पादयुग्मं सदावतु ॥ ॐ रागाधिष्ठातृदेव्यै सर्वांगं मे सदावतु ॥ १९ ॥ ॐ सर्वकंठवासिन्यै स्वाहा प्राच्यां सदावतु ॥ ॐ ह्रीं जिह्वाग्रवासिन्यै स्वाहाऽग्निदिशि रक्षतु ॥ २० ॥ ऐं ह्रीं श्रीं सरस्वत्यै बुधजनन्यै स्वाहा ॥ सततं मंत्रराजोऽयं दक्षिणे मां सदावतु ॥ २१ ॥ ॐ ह्रीं श्रीं त्र्यक्षरो मंत्रो नैर्ऋत्यां मे सदावतु ॥ कविजिह्वाग्रवासिन्यै स्वाहा मां वारुणेऽवतु ॥ २२ ॥ ॐ सदा-